4. ऋग्वेदः, १०।३१।३
5. पी. वी. काणे, धर्मशास्त्र का इतिहास, भाग ३ पृ. १३०१ (हि. सं.,)
6. नारदभक्तिसूत्राणि, ६७-६९ ।
7. श्रीमद्भागवतम्, १।१३।१० ।

**ध्यानपूते ज्ञानजले रागद्वेषमलापहे ।**
**यः स्नाति मानसे तीर्थे स याति परमां गतिम्**[8] **॥**

काशी-काञ्ची-अयोध्याप्रभृतयः सप्त नगर्यः, पुष्करादितीर्थानि च भौमतीर्थान्युच्यन्ते । तथाहि–

**काशी काञ्ची च मायाख्या त्वयोध्या द्वारवत्यपि ।**
**मथुरावन्तिकाश्चैव सप्तपुर्योऽत्र मोक्षदाः**[9] **॥**

भौमतीर्थेषु भूमेः प्रभावः, जलस्य तेजोऽपि कारणतया स्वीक्रियेते । मुनिमहात्मनामावाससम्बन्धोऽपि भूमेः पावनत्वे हेतुः । तथाहि–

**प्रभावादद्भुताद् भूमेः सलिलस्य च तेजसा ।**
**परिग्रहमुनीनां च तीर्थानां पुण्यता मता**[10] **॥**

स्कन्दपुराणं महात्मनामावासभूमिं तीर्थं वक्ति, सतां सङ्गतं तीर्थसेवनादप्यधिकं महत्त्वपूर्णमिति स्फुटं स्वीकरोति । तथाहि–

**'तीर्थादप्यधिकः स्थाने सतां साधुसमागमः'**[11] **।**

पद्मपुराणमीश्वरस्य कृष्णस्य नामकीर्तनमपि परमतीर्थमङ्गीकरोति ।

**तथाहि–**

**तीर्थानां परम तीर्थं कृष्णनाम महर्षयः ।**
**तीर्थीकुर्वन्ति जगतीं गृहीतं कृष्णनाम यैः**[12] **॥**

ब्रह्मपुराणानुसारेण भगवतो निवासभूतमिदं शरीरमपि तीर्थं मन्यते । शुद्धं मनः, वाक्, इन्द्रियसंयम इत्येतानि शरीरजानि तीर्थानि स्वर्गपथं निर्दिशन्ति । तथाहि–

**मनो विशुद्धं पुरुषस्य तीर्थं वाचा तथा चेन्द्रियनिग्रहश्च ।**
**एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति**[13] **॥**

ब्रह्मपुराणं (७०।१६-१८) तीर्थस्य दैवासुरार्षमानुषरूपान् चतुरो भेदानूरीकरोति । तदेव पुराणं (७०।२१) भारतवर्षस्य कर्मभूमितया सम्पूर्णमपि भारतं तीर्थं मनुते । स्वदेशं भारतं प्रति पुराणकर्तुरुदात्तभावना सर्वथा श्लाधनीया वरीवर्ति ।

---

8. स्कन्दपुराणे काशीखण्डः, ६।४१ ।
9. " " , ६।६८ ।
10. महाभारते अनु. प., १०८।१९
11. स्क. मा. कुमा., ११।६ ।
12. पद्म. स्व. ख., ५०।१६ ।
13. ब्रह्मपु., २५।३

सन्ति तीर्थानि तत्त्वतो भारतस्य जातेः, संस्कृतेश्चैकतायाः समन्वयमालामणयः । अस्यैव सांस्कृतिकैक्यस्य प्रभावेण विषमायां परिस्थितावपि समस्तमपि भारतं सत्यपि वैविध्ये धार्मिकैकतायाः सूत्रे निबद्धं विद्यते । विभिन्नासु जातिषु सम्प्रदायेषु च विश्वासं कुर्वन्तो भारतीया दक्षिणोत्तरयोः पूर्वपश्चिमयोश्च भेदं विस्मृत्य तीर्थानां सार्वभौमं महत्त्व-मङ्गीकुर्वाणाः तीर्थेषु पर्यटन्ति ।

स्कन्दपुराणस्य सूतसंहिताऽपि शिवसम्बन्धीनि कानिचित् तीर्थानि, तेषाञ्च वैशिष्ट्यं वर्णयति । सूतसंहितायाः शिवमाहात्म्यखण्डस्यान्तिमेऽध्याये गङ्गाद्वारम्, सोमतीर्थम्, वाराणसी, प्रयागः, गङ्गासागरः, नर्मदातीर्थम्, यमुनातीर्थं, सरस्वती, गोदावरी, कृष्णवेणी, स्वर्णमुखी, कम्पा, कुटिला, मणिमुक्ता, शिवगङ्गा, गुह्यतीर्थम्, ब्रह्मतीर्थम्, सूर्यपुष्करणी, कावेरीतीर्थम्, क्षीरकुण्डम्, देवतीर्थं गन्धमादनपर्वतश्चेति द्वाविंशति तीर्थानि वर्णितानि सन्ति । यद्यपि पूर्वोक्ततीर्थानां भौगोलिकी स्थितिस्तत्र नातिस्पष्टा तथापि प्रायशः तान्येव तीर्थानि निर्दिष्टानि, यानि शिवप्रधानेष्वन्येषु पुराणेषु वर्णितानि विद्यन्ते । सूतसंहिताया-मुपर्युक्ततीर्थानां स्नानकालस्य, तेषाञ्च फलानामपि सविस्तरं वर्णनं वर्तते । मुख्यतया सर्वेषु तीर्थेषु स्नानस्य शिवपूजनस्य च विशिष्टं फलं पापमुक्तिपूर्विका मोक्षोपलब्धिः वर्णिता वर्तते । अस्ति तीर्थसेवने श्रद्धायाः प्राधान्यम् । श्रद्धामन्तरा तीर्थमाहात्म्यश्रवणम्, तीर्थानां महत्त्वं च निष्फले भवतः । तथाहि–

**वदामि तीर्थमाहात्म्यं संग्रहेण मुनीश्वराः ।**
**शृणुध्वं सर्वशास्त्रोक्तं श्रद्धया परया सह । (सू. सं. १।१३।२)**

तद्विरहे तीर्थानामपि निष्फलत्वम्–

**मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भेषजे गुरौ ।**
**यादृशी भावना यत्र सिद्धिर्भवति तादृशी**[14] **॥**

सूतसंहितायां, भगवता शिवेनैव प्राणिनां पापशुद्धये कतिपयानि तीर्थस्थलानि विनिर्मितानि इति वर्णितम् ॥

तथाहि– **निर्मितानि शिवेनैव भूमौ स्थानानि देहिनाम् ।**
**सर्वपापविशुद्ध्यर्थं तानि वक्ष्याम्यशेषतः**[15] **॥**

सूतसंहितायां शिवेन निर्मितानां ४१ पुण्यस्थलानां, देवीभिः सह देवानाञ्च स्पष्टमुल्लेखो वर्तते । संहितावर्णिततीर्थानां तालिका अधस्तना द्रष्टव्या–

| क्रमसंख्या | तीर्थस्थानम् | देवः | देवी |
|---|---|---|---|
| १– | अमेरशम् | आङ्कार संज्ञकेश्वरः | महेश्वरी (चण्डिका) |
| २– | प्रभासः | सोमनाथः | पुष्करेक्षणी शिवा |

14. सूतसहिंतातात्पर्यटीका, १।१३।२
15. सूतसंहिता, ४।४३।२

| | | | |
|---|---|---|---|
| ३– | नैमिषम् | देवदेवः | लिङ्गधारिणी प्राज्ञा |
| ४– | पुष्करम् | रजोगन्धिमहादेवः | पुरुहूता |
| ५– | आषाढी | आषाढारीशो हरः | परमेश्वरी रतिः |
| ६– | चण्डमुण्डी | दण्डी-महादेवः | दण्डिनी परमेश्वरी |
| ७– | भारभूतिः | भारभूतिः | भूतिः |
| ८– | नाकुलम् | नकुलीशः | शिवा |
| ९– | हरिश्चन्द्रः | हरः | चण्डिका |
| १०– | श्रीपर्वतः | त्रिपुरान्तकशंकरः | मायाविनी शंकरी |
| ११– | जप्येश्वरः | त्रिशूली शंकरः | त्रिशूला शंकरी |
| १२– | आम्रातकेश्वरः | सूक्ष्मरूद्रः | सूक्ष्मा |
| १३– | महाकालः | महाकाल हरः | शंकरी महेश्वरी |
| १४– | मध्यमः | शर्वः | शर्वाणी |
| १५– | केदारम् | ईशानः | मार्गदायिनी |
| १६– | भैरवः | भैरवः | भैरवी |
| १७– | गया | प्रपितामहः शंकरः | मङ्गला |
| १८– | कुरुक्षेत्रम् | स्थाणुः | स्थाणुप्रिया |
| १९– | लाकुलम् | स्वयंभूः | स्वायम्भुवी |
| २०– | कनखलम् | उग्रमहादेवः | उग्रा शिवा |
| २१– | विमलेश्वरः | विश्वमहादेवः | विश्वेशा |
| २२– | अट्टहासः | महानन्दः | महानन्दा |
| २३– | महेन्द्रः | महान्तकः | महान्तका |
| २४– | भीमः | भीमेश्वरः | भीमेश्वरा शिवा |
| २५– | वस्त्रापथम् | भवः | भवानी |
| २६– | अर्धकोटिः | महायोगी | रुद्राणी |
| २७– | अविमुक्तम् | महादेव शंभुः | विशालाक्षी शिवा |
| २८– | महालयः | रुद्रः | महाभागा शिवा |
| २९– | गोकर्णः | महाबलः | भद्रकर्णिका |
| ३०– | भद्रकर्णः | शिवः | भद्रा |
| ३१– | सुवर्णाक्षम् | सहस्राक्षः | उत्पलाक्षी शिवा |
| ३२– | स्थाणुः | स्थाण्वीश्वरः | स्थाण्वीश्वरी |
| ३३– | कमलालयः | कमलहरः | कमला महेश्वरी |
| ३४– | धागण्डलम् | कपर्दी | प्रचण्डा |
| ३५– | कुरण्डम् | ऊर्ध्वरेता | त्रिसन्ध्या |
| ३६– | माकोटम् | महोत्कटः | मुकुटेश्वरी |
| ३७– | मण्डलेश्वरः | श्रीकण्ठः | शाण्डकी |

| | | | |
|---|---|---|---|
| ३८– | कालञ्जरम् | नीलकण्ठः | काली |
| ३९– | शङ्कुकर्णः | महातेजा हरः | ध्वनिः |
| ४०– | स्थूलेश्वरः | स्थूलः | स्थूला |
| ४१– | श्रीमद्व्याघ्रपुरम् | सभापतिहरः | दभ्रसभापत्नी शिवा |

———————— (सू. सं. यज्ञ० ४।४३।३-४३)

उपर्युक्तायास्तालिकायाः पर्यवेक्षणेन स्फुटं प्रतीयते यत् समेषां ४१ संख्याकानां तीर्थानां देवः शिवः देवी च शिवा एव विभिन्ननामभिः समुल्लिखितौ स्तः ।

कतिपयैर्भौमतीर्थैः सहैव सूतसंहिता आत्मतीर्थभावतीर्थयोरपि संकेतं ददाति, भौमतीर्थापेक्षया चात्मतीर्थस्य वैशिष्ट्यमूरीकरोति । शरीरमिदं तीर्थमिति पूर्वमुक्तम् । अस्मिन् प्रसङ्गेऽस्ति संहिताया भणितिः–

**श्रीपर्वतः शिरःस्थाने केदारं तु ललाटके ।**
**वाराणसी महाप्राज्ञ भ्रुवोर्घ्राणस्य मध्यमे ॥**
**कुरुक्षेत्रं कुचस्थाने प्रयागो हृत्सरोरुहे ।**
**चिदम्बरं च हृन्मध्य आधारः कमलालयः**[16] **॥**

मानवसरीरमेव बाह्यतीर्थप्रतीकमिति अस्ति संहिताया आशयः ।

जाबालोपनिषदि भ्रूघ्राणयोः सन्धिस्थानं 'वाराणसी' इत्युक्तमस्ति । **'भ्रुवोर्घ्राणस्य यः सन्धिरिति जाबालकी श्रुतिः'** इति वदन्ती सूतसंहिताऽपि उपनिषदो मतमेव समर्थयति । जाबालोपनिषद् 'वाराणसी'-शब्दस्याध्यात्मिकमर्थं विस्तरेणैवं विवृणोति–

**'अथ हैनमत्रिः प्रपच्छ याज्ञवल्क्यं य एषोऽनन्तोऽव्यक्त आत्मा तं कथमहं विजानीयामिति । स होवाच याज्ञवल्क्यः सोऽविमुक्त उपास्यो य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नासीति सर्वानिन्द्रियकृत दोषान्वारयति तेन वरणा भवति, सर्वानिन्द्रियकृतान् पापान् नाशयति तेन नासी भवति इति कतमं चास्य स्थानं भवति इति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति'**

(जाबालोपनिषद् द्वितीयः खण्डः)

उपनिषत्प्रतिपादितममुमेवगूढार्थमाधारीकृत्य वाराणसीतीर्थमपि पापनाशकमित्युच्यते । सूतसंहिता अस्यैवात्मतीर्थस्य उपासनां श्रेयस्करीं मनुते । आत्मतीर्थं विहाय बाह्यतीर्थोपासनं हि हस्तगतं महारत्नं परित्यज्य काचान्वेषणमिव प्रतीयते । तथाहि–

**आत्मस्थं तीर्थमुत्सृत्य बहिस्तीर्थानि यो व्रजेत् ।**
**करस्थं स महारत्नं त्यक्त्वा काचं विमार्गति ॥**

भावतीर्थविषयेऽस्ति संहितायाः सशक्तं कथनम्–भावतीर्थं हि सर्वकर्मसु परमं तीर्थं विद्यते । एकमेवालिङ्गनकर्म कान्तायां दुहितरि च भावभेदादेव वैभिन्यं भजते ।

---

16. सूतसंहिता, २।११।५०–५१ ।

तथाहि–

**भावतीर्थं परं तीर्थं प्रमाणं सर्वकर्मसु ।**
**अन्यथालिङ्ग्यते कान्ता भावेन दुहिताऽन्यथा[17] ॥**

अत्र शास्त्रप्रतिपादितेषु प्राकृततीर्थेषु श्रद्धैव भावो विद्यते । बाह्यतीर्थेषु, स्नानदेवपूजनादिपुण्यकार्येषु अपि भावशुद्धिदशायामेवाभीष्टफलप्राप्तिरतो यदि भावः पूर्णतया शुद्धतां गच्छति तर्हि ज्ञानिनां कृते भौमतीर्थानां महत्त्वं न विद्यते ।

तथा हि–

**तीर्थानि तोयपूर्णानि देवान्काष्ठादिनिर्मितान् ।**
**योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारिणः[18] ॥**

भावशुद्धिं विना दुष्टं चित्तं तथैव न शुध्यति स्नानमात्रेण, यथा शतशोऽपि जलसमूहैः धौतं सुरापात्रं शुद्धिं नार्हति । तथाहि–

**चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति ।**
**शतशोऽपि जलैर्धौतं सुराभाण्डमिवाशुचि[19] ॥**

सूतसंहितामते परमात्मा शिवोऽस्मिन्नेव देहे प्रतिष्ठितोऽतस्तीर्थदानयज्ञप्रतिमासु शिवं द्रष्टुकामा विमूढाः सन्ति–

**तीर्थे दाने तपोयज्ञे काष्ठे पाषाणके सदा ।**
**शिवं पश्यति मूढात्मा शिवो देहे प्रतिष्ठितः[20] ॥**

योगिनस्तु स्वात्मसु शिवं साक्षात्कुर्वन्ति । तीर्थेषु प्रतिमाकल्पना तु अज्ञानां भावनायै कृता विद्यते–

**शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।**
**अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः[21] ॥**

संहितादृष्ट्या भौमतीर्थानि आत्मतीर्थोपासनायाः सहायभूतानि भवन्ति । तीर्थविषये संहिताया उदगारोऽयमुन्नतामध्यात्मभूमिमवलम्बते, यत्र सामान्यलोकव्यवहारो नावतिष्ठते, यत्र च व्यवहारस्य गतिर्नास्ति ।

इत्थं हि तीर्थतत्त्वमस्माकं सांस्कृतिकीं चेतनां सततं जागरयति । भौमात्मभावतीर्थानि हि न केवलमस्मान् भारतीयान्, अपि तु भारतीयां संस्कृतिं प्रति समाकृष्यन् वैदेशिकानपि अपावयन् पावयन्ति पावयिष्यन्ति चेति ।

●

---

17. सू. सं., २।११।५३
18. सू. सं., २।११।५४
19. सू. सं., २।११।५६
20. सू. सं., २।११।५९
21. सू. सं. २।११।६२

# GLEANINGS FROM THE BRAHMAVAIVARTAPURĀṆA

*BY*

**N. GANGADHARAN**

[ ब्रह्मवैवर्तपुराणमष्टादशपुराणेषु दशमं पुराणं परिगण्यते । अस्मिन् ब्रह्मखण्ड-प्रकृतिखण्ड-गणपतिखण्ड-श्रीकृष्णजन्मखण्डनामभिर्विभागो वर्तते । संप्रति पुराणेऽस्मिन् श्लोकानां संख्या विंशतिसहस्रं प्राप्यते । अस्मिन् निबन्धे विपश्चिता लेखकेन पुराणस्य सामान्यं परिचयं दत्त्वा औषधिविषयकानामध्यायानां विशेषरूपेण परिचयः प्रदत्तः । ]

The *Brahmavaiavartapurāṇa* counted as the tenth among the eighteen major *Purāṇas* containing about 20,500 verses in 276 chs. is divided into four sections-

(1) *Brahmakhaṇḍa* (30 chs.), (2) *Prakṛtikhaṇḍa* (67 chs.), (3) *Gaṇapatikhaṇḍa* (46 chs.) and (4) *Śrīkṛṣṇajanmakhaṇḍa* (133 chs.). Although the *Matsyapurṇa* and the *Nāradapurāṇa* give the total number of verses as 18000, the additional number of verses in the vulgate text indicates that the *Purāṇa* has not come down to us in its original form. Moreover many quotations in the medieval *dharmanibandhas* are not traced in this text.[1]

The *Brahmavaivartapurāṇa* has a distinct characteristic that it contains accounts glorifying Viṣṇu in the form of Kṛṣṇa. Its main objective is to glorify the life and work of Śrī Kṛṣṇa. The salient features of these four sections are - 1) the creation of the universe by lord Kṛṣṇa, 2) the nature of Prakṛti manifesting as the five female divine forms - Durgā, Rādhā, Lakṣmī, Sarasvatī and Sāvitrī, 3) The legends about Gaṇeśa, given as a manifestation of lord Kṛṣṇa, and 4) the life of lord Kṛṣṇa, elevating Rādhā to the status of a spouse.

It is well-known that the *Purāṇas* are expected to satisfy five characteristics - *sarga* (primary creation), *pratisarga* (secondary creation), *vaṁśa* (genealogy of gods and sages), *manvantara* (Manu periods) and *vaṁśānucarita* (the accounts of royal genealogies). But this *Purāṇa* states that the traditional five characteristics are applicable only to the *Upapurāṇas* and lists the ten topics to be dealt with in a *Mahāpurāṇa* :

---

1. R.C. Hazra, *Puranic Records on Hindu Rites and Customs*, Motilal Banarsidass, Delhi (Reprint), 1987, p. 166.

सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषां च पालनम् ।
कर्मणां वासना वार्ता मनूनां चाक्रमेण च ॥
वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।
तत्कीर्तनं हरेरेव देवानां वा पृथक् पृथक् ॥
दशाधिकं लक्षणं च महतां परिकीर्तितम् ।

IV.133, 8-10 ab

They are primary creation, secondary creation, stability of creation, protection, desire for work, information about Manus, description of the destruction of the world, showing the way for liberation and glorification of Viṣṇu and other gods. But these ten topics could be included under the five well-known topics.

In the first section the *Brahmakhaṇḍa* we have an interesting account of the salient features of medicine while describing the legend relating to the mutual curses of Brahmā and Nārada on one another as a result of which Ñarada was born as the son of a Gandharva king. He was named as Upabarhaṇa meaning 'more adorable'. He grew up into a handsome youth and had many wives and the chief among them was Mālāvatī, daughter of Citraratha. Once as Upabarhaṇa was passing through the world of Brahmā he beheld the beautiful dancing Rambhā and lost control of his senses. Brahmā cursed him angrily to be born as a Śūdra.[2] As a consequence of the curse he was dead and Mālāvatī lamented much with intense grief and was threatening to curse Brahmā, already deprived of the worship on account of the curse of Nārada, to lose his privilege of authority over mundane existence. Similarly she was threatening to curse each one of the gods to lose their respective authority. All the gods were alarmed and sought the protection from Viṣṇu. At that time an invisible voice directed them to go to Mālāvatī herself assuring that Viṣṇu would go there later in the guise of a brahmin for their protection. Accordingly Viṣṇu arrived there in the guise of a brahmin boy and requested Mālāvatī to explain him the cause of her grief. After hearing her story and offering her good counsel, Viṣṇu as a boy announced himself as a well-versed person in the science of medicine and capable of reviving a person almost dead or a person dead a week earlier on account of illness.[3]

It is stated here that the medical science was first created by Brahmā after reflecting on the purport of the four *Vedas* and then imparted it to the Sun-god. The latter then imparted that to his disciples. They then made

2. 8, 24-28; 41-48; 64-65.
3. chs. 13-15

further medical treatises.[4] The *Pruāṇa* gives the names of the sixteen experts and the medical treatises composed by them respectively :[5]

The Medical Authorities and treatises ascribed to them :

| | | |
|---|---|---|
| Sun god | – | Bhāskarasaṁhitā |
| Dhanvantari | – | Cikitsādarpaṇa |
| Kāśirāja | – | Cikitsākaumudī |
| Aśvinīkumāra | – | Cikitsāsāratantra and Bhramagna |
| Nakula | – | Vaidyakasarvasva |
| Sahadeva | – | Vyādhisindhuvimardana |
| Yamarāja | – | Jnānārṇavatantra |
| Cyavana | – | Jīvadāna (vidhi) |
| Janaka (Ascetic) | – | Vaidyasandehabhanjana |
| Budha | – | Sarvasāra |
| Jābāla | – | Vedāṅgasāratantra |
| Paila | – | Tantrasāraka |
| Karatha | – | Sarvadhara |
| Agastya | – | Dvaidhanirṇaya |

Most of these names are known only from this quotation in the *Brahmavaivartapurāṇa*. Moreover most of the names are either eponymous authors or eminent sages. The titles of the works mentioned are also not noticed in the New Catalogus Catalogorum. It is hence difficult to decide whether such works actually existed.

We find here general remarks. Omitting the narrative characteristics of the *Purāṇa* the bare thread is given below. A physician is not the master of one's longevity.The ability of a physician is known from his knowledge about the nature of the disease and the suppression of pain.[6] Fever is said to be the father of all diseases and unavoidable.[7] Indigestion is stated to be its progenitor. Further indigestion is caused by the deranged biles, phlegm and wind. Hence fevers are of three kinds based on these three factors individually and a fourth one on the combined effect of all these three.[8]

**The Sixteen Basic Diseases :**

The names of sixteen basic diseases giving rise to sixtyfour diseases arising from their combined effect are :

4. 16, 9-11.
5. 16, 13-22.
6. 16, 25.
7. 16, 27.
8. 16, 30.

White leprosy, jaundice, leprosy, tumour, the enlargement of spleen, colic, fever, dysentery, diarrhoea, consumption, ulcer, *halīmaka* (a kind of jaundice), stranguary, enlargement of the spleen, derangement of the blood, chronic urinary disease, *kabja* (seems to be hump on the back), *goda* (seems to be cilariasis), goitre, vertigo, fever arising from the combination of the three deranged humours and cholera of severe type. Sixtyfour diseases are stated to be arising from the internal divisions of the above mentioned sixteen basic diseases.[9]

**The preventive measures against decrepitude and illness :**

1) Washing the eyes with water, doing exercise, rubbing the scales with oil, dropping oil in the ears and applying oil on the head,[10]

2) walking in the spring, warming oneself moderately in front of the fire and enjoying the company of young women at the appropriate time,[11]

3) bathing in the cold water of a pond, besmearing sandal paste and enjoying the breeze,[12]

4) bathing in hot water in the rainy season, avoiding the use of hard water and eating balanced food at the appropriate time,[13]

5) avoiding the consumption of pungent things in the autumn, avoiding roaming in that season; bathing in the pond and eating even food,[14]

6) bathing in the pond in early winter, enjoying fire at the appropriate time and eating fresh and hot food,[15]

7)enjoying mild fire, eating fresh and hot food and bathing in hot water in the winter,[16]

8) eating fresh meat and fresh food and enjoying the company of young woman, taking milky food and ghee,[17]

9) taking wholesome food when hungry, drinking water when thirsty and chewing betels daily,[18]

10) taking curd, clarified butter, butter and molasses daily.[19]

---

9. 16, 31-33.
10. 16, 36.
11. 16, 37.
12. 16, 38.
13. 16, 39.
14. 16, 40.
15. 16, 41.
16. 16, 42.
17. 16, 43.
18. 16; 44.
19. 16, 45.

**Causes of aging quickly :**

1) eating dry meat, enjoying the company of old woman, exposure to rising sun and partaking fresh curd,[20]

2) consuming curd in the night, enjoying the company of harlots and menstruous women,[21]

3) taking food from a menstruous woman etc. (the other factors mentioned here are related to general purity).[22]

It then stresses that sin engenders disease, decrepitude, poverty, unhappiness and grief.[23]

**The effect of the three deranged humours and the remedies against the same :**

Bile is produced (1) (in the mystic circle Maṇipūraka) when one does not eat when hungry; [24]

(2) by drinking water immediately after eating the fruit of palmyra or *bilva*;[25]

(3) by serving hot water on the head and using sour things in the month of Bhādra (September) and eating when one is under the spell of fate.[26]

**The remedies for biles :**

1) The coriander mixed sugar and ground well with cold water, gram, all the products got from a cow except curd and butter-milk, ripe palmyra and *bilva* fruits, all sugarcane products, ginger, soup of green gram ground with sesamum and mixed with sugar.[27]

**The cause of excess production of phlegm :**

(1) Bathing after taking food, drinking water without thirst; (use of) sesamum oil, sticky oil and juice of myrobalan, stale food, butter-milk, ripe banana fruit, curd, rain water, sugar mixed with water and use of sticky water, coconut juice; bathing in dirty old water, (use of) ripe fruit of *tarugūñjā* (a kind of berry), ripe cucumber fruit; bathing in the pond in the rainy season and (eating) radish. It has its origin in the region of the Brahmarandra.[28]

---

20. 16, 46.
21. 16, 47.
22. 16, 48-49.
23. 16, 51.
24. 16, 58.
25. 16, 59.
26. 16, 60.
27. 16, 61-63.
28. 16, 64-67.

**The remedies for phlegm:**

Perspiration by means of fire, use of parched things, besmearing with refined (baked) oil, wandering, eating dry things, partaking dry and ripe yellow myrabolan, unripe *piṇḍāraka,* unripe banana fruit, *vesavāra* ( a condiment consisting of ground coriander, mustard, pepper, ginger etc.), *sindhuvāra* (a tree), abstaining from food and drink, use of *rocanā* (a kind of yellow pigment got from the cow) powder together with ghee, pepper, fig, dry ginger, *jīvaka* and honey.[29]

**The cause for the excess production of wind:**

Walking, running and cutting soon after partaking food, heat of fire, wandering, having sexual union frequently, having union with an old woman, mental tormentation, (consuming) extremely dry food, abstaining from food, fight, quarrel, harsh words and fear and grief. It has its origin in the nerve-cintre of Ājñā.[30]

**The remedies for wind:**

Ripe banana fruit, water mixed with sugar together with seeds, coconut juice, fresh butter-milk, cake made of flour, sweet curd from the buffalo, stale food, jujube fruit, cold water, variety of refined oil, sesamum oil, coconut, palmyra, date, hot myrabolan juice, bathing in cold or hot water, cool bed of lotus leaf and cooling fans.[31]

In a subsequent chapter we have an instruction regarding the food permissible and not permissible for eating. Although the nature of the instruction bears a religious character, the possibility of an underlying medicinal value may not be ignored in some of these instructions. Omitting those of purely religious character we may cite some examples of those which are forbidden:

1)drinking milk from a copper vessel;[32]
2) drinking coconut water from a bell-metal vessel;[33]
3) taking honey kept in a bell-metal vessel;[34]
4) eating *vāniṅgaṇaphala* (?) in the month of Kārttika.

The correctness and the identity of this item is not clear. Similarly eating *mūlaka* in Māgha and *kalambi* in śayana (ekādaśī);[35]

---

29. 16, 68-71.
30. 16, 72-74.
31. 16, 75-78.
32. 27-22.
33. 27, 23.
34. 27, 24.
35. 27. 26.

5) white variety of *tāla,* masūra and fish.[36]

There are certain other prohibitions regarding the consumption of certain items on certain lunar days such as *paṭola* on the third, *bilva* on the fifth, *nimba* on the sixth etc. as leading to destruction of amity etc.[37] It is not known whether they have any purpose other than the religious one.

The foregoing account gives a bird's eye view of the material relating to medicine in the *Brahmavaivartapurāṇa* highlighting the usefulness of the same. The *Purāṇas* are the potential source-books for understanding our ancient culture. It is earnestly felt that this short notice would enable to kindle the interest in the study of the *Purāṇas.*

36. 27, 27.
37. 27, 29-35.

## BOOK-REVIEW

**NYĀYAKUSUMĀÑJALI** of Udayanācārya With Translation and Explanation Volume I. By N. S. Dravid, Indian Council of Philosophical Research, New Delhi 1996, XIII.

The book is required reading by any one interested in Nyāya philosophy. It is a lucid and intelligible translation of Udayan's difficult and great work Nyāyakusumāñjali. Udayanācārya was the most outstanding thinker of this school. In this text he tries to defend rigorously the main doctrines of Nyāya-school. The text consists of five parts or five bunch of flowers. The first part deals mainly with the problem of causation; the second with valid knowledge; the third with absence; the fourth with the validity of knowledge of God and last with the proofs for the existence of God.

The text contains verses and passages from various other sources. It would have been better if the author had located their sources. Seen in the light of works published in Hindi, this was not a difficult job.

It would not be possible to make remarks on the analytical side of the text as Prof. Dravid has reserved his comments for another volume.

The positive points of the book is that it is not only useful for specialists in Nyāya philosophy but also for those interested simply in contemporary philosophical problems.

But the text is too difficult to read without the help of some explanations. In this regard, Prof. N. S. Dravid's translation of this text is really an invaluable aid to our understanding of Indian philosophy for readers in English. Late M. M. Dr. Gopinath Kaviraj started to translate it but he could not complete it. Some portions of this text have been published by him in "Sarasvati Bhawan Studies". Cowel's translation is mainly based on the commentary of Haridas Bhattacharya. Prof. N.S. Dravid's translation is more faithful to the spirit of the text, so it stands as a better aid for a reader interested in having an unbiased opinion about the text.

**–A. K. Rai**

## ACTIVITIES OF THE ALL INDIA KASHIRAJ TRUST

(January 1997-June-1997)

**GARUḌA PURĀṆA WORK**

The printing of the ciritical edition of the Garuḍa Purāṇa is continuing. Some further chapters are composed and correction of proofs is being done. Work on appendices is also continued.

**WORK ON UNPUBLISHED PURĀṆA MANUSCRIPTS.**

The work on critically editing the Vāsiṣṭha Linga Purāṇa is completed and the complete text is printed. The last 32 pages of this Purāṇa are attached in the issue. Work on introduction and indices of this Purāṇa is continuing.

**VEDA-PĀRĀYAṆA**

In white half of the month Māgha Kṛṣṇa Yajurveda Saṁhitā with its Brāhmaṇa, Āraṇyaka and Upaniṣad was recited in Vyāsa temple of Fort Ramnagar (from 8.2.97 to 22.2.97) by Pt. Sri Narayan Ghanpathi. The Śrotā or observer was Sri Vireshwara Shastri Dravid. On successful completion of Pārāyaṇa Dakṣiṇā was given to the reciter and the Śirotā.

**VISITORS TO THE PURĀṆA DEPARTMENT**

During the period many scholars visited the Purāṇa Department. Many scholars came for consulting the journals and books. All facilities were provided to them. Following visitors put their signature in the visitors book.

1. Mr. Jongsoon Seo - Seul, South Korea - 13.2.97.
2. Mr. D.O. Minnicelli 23.1.97.
3. Mr. Paul Martin Dubost-France.
4. Mr. Sukumar Sircar, Director General, National Archive, New Delhi. 10.6.97.
5. Sri Krisna Kumar Pandey, 12.6.97.

## ACTIVITIES OF THE SISTER TRUSTS

### 1. Maharaja Benares Vidya Mandir Trust.

### DHRUPAD MELA 1997

The 1997 Dhrupad Mela at Dhrupad Teerth, Tulsi Ghat, Varanasi was the 23rd consecutive annual. This was held from March 5-7 by

Maharaja Benaras Vidya Mandir Trust. The Mela was inaugurated by Yuvaraja Sri Anant Narain Singh on the opening day. He emphasized the importance of Dhrupad and expressed his satisfaction on the impact of this Mela. He thanked Professor Veerbhadra Misra for his services in organising and conducting the Mela. Several eminent personalities and Dhrupad performers of eminence were present in the audience. Around 70 Dhrupad musicians took part in the Mela.

Some of the artists were Pt. Siya Ram Tiwari, Shri Sukdev Pawar, Ud Sayeeduddin Dagar, Utsava Shinde, Prem Kumar Mallik, Prof. Raj Bhan Singh, Dr. Ritwik Sanyal, Shri Rama Kant Pathak etc.

## 2. MAHARAJA UDIT NARAIN SINGH MANASA PRACHAR NIDHI

Under the auspices of this Trust Navāha Pārāyaṇa (a nine-day Pārāyaṇa) and Pravacana of Rāmacaritamānasa was organised in the Kali Temple of Chakia. The Pārāyaṇa and Pravacana were performed from Vaiśākha Śukla Dvitīyā to Vaiśākha Śukla Daśamī of 2054 Vikrama era (May 8-16, 1997)

Famous Vyāsas gave discourses on Rāmāyaṇa. A large number of public listened to the Pravacana. The Pravacanas were also attended by His Highness Maharaja Dr. Vibhuti Narain Singh. On conclusion a Bhandara was organised.

## VICE PRESIDENT'S VISIT TO NANDESAR PALACE

His Highness Maharaja Dr. Vibhuti Narain Singh hosted a luncheon in honour of His Excellency Sri K.R.Narayanan and Srimati Usha Narayanan at the Nandesar palace on 22 May 1997. The dignitaries and prominent citizens of Varanasi were also invited to the Luncheon. His Highness Maharaja Dr. Vibhuti Narain Singh presented a set of publications of the All-India Kashiraj Trust and the Vishva Sanskrit Pratishthanam to the distinguished guest.

# सर्वभारतीयकाशिराजन्यासस्य कार्यविवरणम्

(जनवरी १९९७-जून१९९७)

## गरुडपुराणकार्यम्

गरुडपुराणस्य मुद्रणकार्यं प्रचरति । केचन अग्रिमाध्याया मुद्रणप्रक्रियायां वर्तन्ते येषां संशोधनं क्रियते । परिशिष्टनिर्माणकार्यमपि प्रचरति ।

**अप्रकाशितपुराणहस्तलेखानां प्रकाशनम्**

वासिष्ठलिङ्गपुराणस्य पाठसमीक्षितसंस्करणस्य मूलपाठः पूर्णरूपेण प्रकाशितो जातः । अस्य मुद्रितपुराणस्य ३२ पृष्ठानि अस्मिन् अङ्के प्रकाशितानि सन्ति । भूमिका-परिशिष्टनिर्माणकार्यं क्रियामाणं वर्तते ।

**वेदपारायणम्**

माघमासे शुक्लपक्षस्य प्रतिपत्तिथिमारम्य पूर्णिमापर्यन्तं (८.२.९७ दिनाङ्कमारम्य २२.२.९७ दिनाङ्कं यावत्) रामनगरदुर्गस्थिते व्यासमन्दिरे कृष्णयर्जुवेदस्य संहिताब्राह्मणा-रण्यकोपनिषदां पारायणं श्रीनारायणघनपाठिमहोदयैः कृतम् । श्रीवीरेश्वरशास्त्रिद्राविड-महाभागाः श्रोतारः आसन् । पारायणसमाप्तौ कर्त्रे पारायणश्रोत्रे च दक्षिणा प्रदत्ता ।

**पुराणविभागे समागता विद्वांसः**

अस्मिन् अवधौ अनेके विद्वांसो ग्रन्थावलोकनार्थं पत्रिकावलोकनार्थं च पुराण-विभागमागताः । तेभ्योऽपेक्षितं साहाय्यं प्रदत्तम् । केचन विद्वांसः आगन्तुकपुस्तिकायां हस्ताक्षराणि कृतवन्तो येषां नामानि अधोनिर्दिष्टानि सन्ति–

१. श्री जाङसन सिव–कोरिया १३.२.९७ दिनाङ्के

२. श्री डी. ओ. मिनिसेली २३.२.९७ दिनाङ्के

३. श्री पाल मार्टिन डुबोस्ट-फ्रान्सदेशीयः

४. श्री सुकुमार सरकारः– राष्ट्रीय पुरातत्त्वस्य महानिदेशकः १०.६.९७ दिनाङ्के

५. श्री कृष्णकुमार पाण्डेयः– १०.६.९७ दिनाङ्के

## सहयोगिन्यासानां कार्यविवरणम्

### (१) महाराजबनारस विद्यामन्दिरन्यासः

#### ध्रुपदमेला

१९९७ वर्षे मार्चमासस्य ५-७ दिनाङ्के द्वात्रिंशद् ध्रुपदमेलायाः आयोजनं वाराणस्यां तुलसीघट्टे संपन्नम् । इदमायोजनं प्रतिवर्षं महाराजबनारस विद्यामन्दिरन्यासेन क्रियते ।

अस्योद्घाटनं श्रीमद्भिः युवराजैः श्रीअनन्तनारायणसिंहमहोदयैः कृतम् । उद्घाटनावसरे मञ्चे पं. सियारामतिवारी, श्रीसुकदेव पवारः, उस्ताद सईदुद्दीन डागरः, प्रेमकुमार मल्लिकः, प्रो. राजभानसिंहः डा. ऋत्विक् सान्याल उपस्थिता आसन् । ध्रुपदमेलायाः साफल्यार्थं प्रो. वीरभद्रमिश्रस्य प्रशंसनं युवराजैः कृतम् । ध्रुपदमेलायां देशस्य सर्वप्रान्तेभ्यः ध्रुपदकलाकाराः सम्मिलिता आसन् ।

## (२) महाराज उदितनारायणसिंह मानसप्रचारनिधिः रामचरितमानसस्य नवाह्नपारायणम्

चकियाक्षेत्रस्थिते कालीमन्दिरे वैशाखमासस्य शुक्लपक्षस्य द्वितीयातिथिमारम्य नवमीतिथिपर्यन्तं (८मई १९९७ दिनाङ्कमारभ्य १६ मई १९९७ दिनाङ्कं यावत् ) श्रीरामचरितमानसस्य नवाह्नपारायणं जातम् । पूर्वाह्णे पारायणं सायं रामचरितमानसमधिकृत्य प्रवचनं जातम् । प्रवचनेषु तत्रभवन्तः काशिनरेशा डा. विभूतिनारायणसिंहशर्मदेवा उपस्थिता आसन् । पारायणसमाप्तौ प्रसादवितरणं ब्राह्मणभोजनमपि जातम् ।

## उपराष्ट्रपतेः श्री के. आर. नारायणमहोदयस्य नन्देश्वरप्रासादे आगमनम्

२२ मई १९९७ दिनाङ्के मध्याह्ने १ वादनकाले तत्र भवद्भिः काशिनरेशैः डा. विभूतिनारायणसिंहशर्मदेवैः उपराष्ट्रपतीनां महामान्यानां श्री के. आर. नारायणमहोदयानां तथा श्रीमत्या उषा नारायण महाभागायाश्च सम्माने मध्याह्नभोजनं प्रदत्तम् । अस्मिन् मध्याह्नभोजने जनपदस्याधिकारिणः विशिष्टजनाश्च सम्मिलिता आसन् । भोजनोपरान्तं उपराष्ट्रपतिमहोदयेभ्यः तत्रभवद्भिः काशिनरेशैः सर्वभारतीयकाशिराजन्यासस्य विश्वसंस्कृतप्रतिष्ठानस्य च प्रकाशनानि उपहारीकृतानि ।

●

माघे मासि मघर्क्षे तु स्वदारैः स्वसुतैः सह ।
सुवर्णमुखरीं प्राप्य स्नानं तस्यां प्रचक्रिरे ॥ ९१ ॥

पूर्वजन्मसु पापानि तैः कृतानि महामुने ।
यानि तानि विनष्टानि स्नाने तस्यां क्षणाद् द्विज ॥ ९२ ॥

पुनर्ब्रह्मन् द्विजश्रेष्ठाः स्थानेऽस्मिन् परमेश्वरम् ।
दृष्ट्वा भूमौ प्रणम्येशं त्रिः कृत्वाऽनु प्रदक्षिणम् ॥ ९३ ॥

लौकिकैर्वैदिकैः स्तोत्रैः स्तुत्वा भक्तिवशाद् द्विजाः ।
दिनमेकमुपोस्यास्यां स्नात्वा नद्यां समाहिताः ॥ ९४ ॥

दत्त्वा हिरण्यं गां भूमिं फलं मूलं च भक्तितः ।
श्रीकालहस्तिनाथाय विदुषे ब्राह्मणाय च ॥ ९५ ॥

इह जन्मकृतात् पापाद् विमुक्ताः परमर्षयः ।
पुनः स्वाश्रममागत्य वशिष्ठ मुनिपुंगवाः ॥ ९६ ॥

शैवं लिङ्गं समादाय स्वदारैः स्वसुतैः सह ।
श्रीमत्पञ्चाक्षरेणैव सतारेण समाहिताः ॥ ९७ ॥

पूजयामासुरीशानं कृत्वा पाशुपतं व्रतम् ।
एवं चिरगते काले तेषां रक्षार्थमादरात् ॥ ९८ ॥

भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ।
उमया सहितः शक्त्या मुने विद्यास्वरूपया ॥ ९९ ॥

---

९१. –b) दे$_2$ स्वदारेः (→ स्वदारैः). –c) दे$_{2.3}$ °मुखरी (→°मुखरीं).

९२. –c) दे$_3$ यानि (→तानि). –d) दे$_2$ क्षणा (→क्षणाद्).

९३. –d) दे$_1$ प्रदक्षिणां (→ प्रदक्षिणम्).

९४. –a) दे$_{2.3}$ लौकिकैर्वैदिकै स्तोत्रै.

९५. –d) दे$_2$ चा (→ च).

९६. –b) दे$_2$ परमर्षयः, + परमर्षयः (→ परमर्षयः). –c) दे$_2$ पुन (→पुनः).

९७. –a) दे$_{2.3}$ शैव (→ शैवं).

९८. –c) दे$_2$ °मने (→ °गते). –d) दे$_2$ राक्षार्थं (→ रक्षार्थं).

नग्नो नृत्यक्रियश्चाहं प्रहसंश्च क्वचित् क्वचित् ।
स्वच्छन्दवृत्तिर्भिक्षार्थं देवदारुवनं गतः ॥ १०० ॥

मां भिक्षमाणं मुनयश्च दृष्ट्वा
स्मृत्वा सरोजासनवाक्यमीशः ।
समागतोऽयं करुणानिधान-
मिति ब्रुवन्तो मुनयः प्रणम्य ॥ १०१ ॥

भक्त्या ममाङ्घ्रिं भवनाशहेतुं
समस्तदेवासुरमौलिजुष्टं ।
प्रगृह्य हस्तैरवशा मुनीन्द्राः
सपुत्रदाराः सलिलार्द्रनेत्राः ॥ १०२ ॥

क्षमस्व देवेश कृपालयानिशं
कृतं तवास्माभिरनिष्टमातुरैः ।
भवार्णवे मग्नजनाननेका-
नतीवकष्टाननुगृह्य मोहितान् ॥ १०३ ॥

इति द्विजेन्द्राः सह बन्धुबान्धवैः
स्वदारपुत्रैश्च मुनीश्वरेश्वरम् ।
प्रकल्प्य पूजां महतीं प्रचक्रिरे
स्वमूर्ध्नि विन्यस्य ममाङ्घ्रिमादरात् ॥ १०४ ॥

ततोऽहमास्थाय निजं वपुर्मुने
त्रिलोचनं साम्बमवोचमञ्जसा ।
विशुद्धविज्ञानमनन्तमुक्तिदं
मुनिभ्य आम्नायवचोभिरादरात् ॥ १०५ ॥

---

१००. –a) दे$_3$ नृत (→ नृत्य). –c) दे$_3$ भिक्षार्थ (→ भिक्षार्थं).

१०१. –d) दे$_3$ वुधतो (→ ब्रुवन्तो).

१०२. –a) दे$_1$ अगयं (→ अङ्घ्रिं).

१०३. –a) दे$_1$ क्षमस्व देवेशकपालमालया विशं निशं. –b) दे$_{2,3}$ तवात्मा° (→ तवास्मा°); दे$_1$ यातुरैः (→ मातुरैः).

१०४. –a) दे$_2$ वांधवै (→ बान्धवैः).

१०५. –d) दे$_2$ °वचे° - (→°वचो°-).

अणोरणीयानहमेव सन्ततं
महानहं विश्वमहं मुनीश्वराः ।
पुरातनोऽहं पुरुषोऽहमीशो
हिरण्मयोऽहं शिव एव केवलम् ॥ १०६ ॥

अपाणिपादोऽहमचक्षुरादिमांस्–
तथापि पश्यामि श्रृणोमि सुव्रताः ।
अहं विजानामि समस्तमात्मना
न मेऽस्ति वेत्ता निजबोधरूपतः ॥ १०७ ॥

वेदैरशेषैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।
न पुण्यपापे मम जन्मनाशौ
न देहयुग्मं न च बुद्धिरस्ति ॥ १०८ ॥

न चास्ति वर्णाश्रमता शरीरतो
न कर्तृता कर्मफलेषु भोक्तृता ।
न मे सदा कारयितात्वकल्पना
न चास्ति शब्दादिजगन्मयंमपि (?) ॥ १०९ ॥

न चास्ति माया मम वेदवित्तमाः
स्वयंप्रभः सर्वजगत्प्रभासकः ।
असङ्गरूपोऽहमतीव निर्मलः
सुखैकविज्ञानघनः स्वभावतः ॥ ११० ॥

---

१०६. –d) दे$_{2.3}$ हिरण्य° (→ हिरण्); दे$_{2.3}$ केवलः (→ केवलम्).

१०७. –a) दे$_{2.3}$ °मान् (→ °मांस–). –b) दे$_1$ श्रुणोमि (→श्रृणोमि)--d) दे$_2$ चा* , दे $_3$, चास्ति (→ मेस्ति); दे$_3$ चेता (→ वेत्ता).

१०८. –a) दे$_3$ वैदेरशेषैरमेद्यो.--c) दे$_3$ जन्म नाशो (→ जन्मनाशौ) . -d) दे$_1$ देहपुण्ये, दे$_2$ हद युग्मं (→ देहयुग्मं).

१०९. –b) दे$_3$ भोक्ता (→ भोक्तृता). –c) दे$_1$ कारयितृत्व°, दे$_3$ करयितात्व° (→ कारयितात्व°). -d) दे$_{1.3}$ शब्दानि (→ शब्दादि); दे$_1$ जगत्मयेमपि (→ जगन्मयंमपि).

११०. दे$_2$. ११०$^a$'वेद' इत्यारभ्य ११९$^b$आत्मरू इति यावत् नास्ति. अग्रे श्लोक संख्याऽपि ११९ तः वर्तते । –a) दे$_1$ मानं (→ माया). –b) दे$_1$ विभासकाः (→ प्रभासकः).

यथैव दण्डादिषु सर्पकल्पना
यथैव शुक्तौ रजतादिकल्पना ।
तथैव मय्यर्पितमात्ममायया
समस्तदृश्यं जगदागमेरितम् ॥ १११ ॥

देहात्मबोधेन समस्तजन्तवः
कुर्वन्ति कर्माणि फलाभिलाषिणः ।
न मे शरीरात्ममतिः स्वभावतस्-
ततो न कर्तव्यमिहास्ति किंचन ॥ ११२ ॥

एकोऽहमासं प्रथमं मुनीन्द्रा
वर्त्तामि पश्चादपि संभवामि च ।
अतो न मत्तः पृथगस्ति किञ्चिद्
विचार्यमाणेऽप्यविचार्यमाणे ॥ ११३ ॥

न मेऽस्ति पूर्वं न परं न चोत्तरं
न बाह्यमस्त्येव सदा मुनीश्वराः ।
यथा च सिन्धूच्छघनो रसात्मकस्
तथैव विज्ञानघनोऽहमास्तिकाः ॥ ११४ ॥

न सन्ति संकल्पविकल्पबुद्धयः
न च प्रमाता प्रमितिः प्रमाणम् ।
प्रमेयज्ञातं च सदा विचारतः
पृथङ् न मत्तः सुखभूमलक्षणात् ॥ ११५ ॥

---

१११. दे 2Θ. –b) दे$_3$ °भावना (→ °कल्पना).

११२. दे 2 Θ. –b) दे$_3$ कुर्वंचि कर्मणि फलाषिणः सदा. –c) दे$_1$ स्वभावतो (→ स्वभावतस्-) .

११३. दे 2 Θ. –a) दे$_3$ मुनीन्द्राः (→ मुनीन्द्रा). –b) दे$_3$ * (च). –d) दे$_3$ विचार्यमाणेऽप्य विचार्यमाणे.

११४. दे 2 Θ . –a) दे$_3$ चोत्तर (→ चोत्तरं). –c) दे$_3$ यथैव (→ यथा च).

११५. दे 2. Θ. –a) दे$_{1.3}$ °बुद्धयो (→ °बुद्धयः). –c) दे$_1$ °जातं (→ °ज्ञातं). –d) दे$_1$ सुखभूप (+म) ल°, दे$_3$ सुस्वरुभमल° (→ सुखभूमल°).

न चास्ति हेयं परमार्थतः सदा
तथैव चादेयमपि द्विजोत्तमाः ।
अतो न साध्यं परमार्थतोऽस्ति मे
न साधनं चाविदुषामिव द्विजाः ॥ ११६ ॥

युस्माकमात्माहमतो हि साक्षी
मत्तो न यूयं पृथगागमज्ञाः ।
तथापि भेदो जलपात्रभेदाद्
विचारकस्यैव शरीरभेदात् ॥ ११७ ॥

न जायते म्रियते चापि नात्मा
नायं भूत्वा भविता चापि भूयः ।
अतो नित्यः शाश्वतोऽयं पुराणः
स्वभावतो विमलो ब्रह्मभूतः ॥ ११८ ॥

एवं विजानन्ति न मां पृथग्जनास्–
तथापि तेषामहमात्मरूपः ।
पुरा विजानन्ति विशुद्धबुद्धयः
स्वरूपमाम्नायवचोभिरेव माम् ॥ ११९ ॥

मुनीश्वराः कर्म विहाय मोहजं
विशुद्धविज्ञानमवाप्य वाक्यजम् ।
विहाय वर्णाश्रमकल्पनामिमां
शरीरमाभासतया विचिन्त्य तम् ॥ १२० ॥

सुखेन वर्त्तध्वमविद्ययागतं
मनुष्यभावं च विहाय देहजम् ।
विहाय संकल्पविकल्पवासना–
मनुग्रहेणाहमवोचमास्तिकाः ॥ १२१ ॥

---

११६. दे 2. Θ . –c) दे$_3$ नम (→ न).

११७. दे 2. Θ . –a) दे$_1$ ह (→ हि). –d) दे$_3$ °*स्यैव (→ °कस्यैव).

११८. दे 2. Θ . –b) दे$_3$ नापि (→ चापि).

१२०. दे 2. Θ . –a) दे$_3$ वि* * (→ विहाय). –b) दे$_3$ विशुद्ध विज्ञान सदा ****. –d) दे$_2$ तां, दे$_3$ मां (→ तम्).

१२१. –a) दे$_3$ . °[ग] तं (→ °गतं).

सुषुप्त्यस्था सुखबोधवस्तुनि
प्रकल्पिता स्वप्नवदात्मनि द्विजाः ।
तथैव जाग्रत्स्वकमाययागतं
ततो विहाय त्रितयं सदानृतम् ॥ १२२ ॥

तुरीयरूपं त्रितयावभासकं
सदा विभातं स्वयमेव मायया ।
अनावृतं वेदनिधिं पुरातनं
महानुभावैरनुभूयतामिह ॥ १२३ ॥

क्रियमाणानि कर्माणि ज्ञानप्राप्तेरनन्तरम् ।
न स्पृशन्ति च विद्वांसं पद्मपत्रं यथा जलम् ॥ १२४ ॥

कर्तारं कर्म बध्नाति कर्तृत्वं विदुषो न च ।
तथापि भाति कर्तृत्वं विदुषो दग्धवस्त्रवत् ॥ १२५ ॥

एतावता न संबन्धः कर्तृत्वं विदुषो भवेत् ।
कर्तृत्वस्य विनष्टत्वान् मुख्यस्याज्ञानहीनतः ॥ १२६ ॥

प्रारब्धकर्मणां भोगात् क्षयो न ज्ञानवह्निना ।
विदुषोऽविदुषश्चापि द्विजा एवं श्रुतिः स्मृतिः ॥ १२७ ॥

अनारब्धानि कर्माणि ज्ञानिनां ज्ञानवह्निना ।
प्रदह्यन्ते यथा वह्नौ प्रोतं तूलं प्रदह्यते ॥ १२८ ॥

---

१२२. –c) दे$_3$ जा * त्. (→ जाग्रत्); दे$_1$ °स्वक°, +°स्वपि° (→ °स्वक°).

१२३. –c) दे$_1$ °निधे (→ °निधिं); दे$_3$ अनावृत वेदनिधि पुरातनं.

१२४. –b) दे$_2$ अनंवरं (→ अनन्तरम्). –c) दे$_1$ संस्पृशंति (→ स्पृशन्ति च).

१२६. –a) दे$_{2.3}$ कर्तृत्वं (→संबन्धः). –b) दे$_{2.3}$ संबंधो (→कर्तृत्वं).–d) दे$_2$ °हानतः (→°हीनतः).

१२७. –c) दे$_2$ °विदुषोवपि (→°विदुषश्चापि). दे$_3$ विदुषो विदुषोवापि. –d) दे$_{1.2}$ श्रुति (दे$_1$ श्र°) स्मृति, दे$_3$ श्रुती श्रुतं (→श्रुतिः स्मृतिः) .

१२८. –a) दे$_3$ कर्मणि (→कर्माणि). –b) दे$_1$ ज्ञानिनो (→ज्ञानिनां). –c) दे$_{1.2}$ प्रहूयते (→प्रदह्यन्ते). –d) दे$_2$ प्रोत (→प्रोतं); दे$_{1.2}$ प्रहूयते (→प्रदह्यते).

अज्ञानाम्भोनिधौ विप्रा निमग्नानां शरीरिणाम् ।
वर्णित्वमाश्रमित्वं च स्वभावादनुवर्तते ॥ १२९ ॥

पुनर्नियोज्यः पुरुषः स्वाध्यायस्य भविष्यति ।
पुनः करोति कर्माणि विवशः पुरमाश्रितः ॥ १३० ॥

तेषां फलोपभोगाय म्रियते जायतेऽपि च ।
एवमेव पुनर्विप्राश्चक्रवद् भ्राम्यते जनः ॥ १३१ ॥

कर्मणामुपभोगेन प्रायश्चित्तेन वा क्षयः ।
आनन्त्याच्च तथाज्ञानात् क्षयो नास्त्येव कर्मणाम् ॥ १३२ ॥

अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥ १३३ ॥

तस्मान्न कर्मणा मुक्तिर्विना ज्ञानेन सुव्रताः ।
ज्ञानादज्ञानविच्छित्तिर्लोके सिद्धा श्रुतावपि ॥ १३४ ॥

भवन्तः केवलं कर्म समाश्रित्य विमुक्तये ।
विहाय सांख्यं वेदोक्तमचिरादेव मुक्तिदम् ॥ १३५ ॥

अज्ञानाच्चान्यथा ज्ञानादकुर्वन्त परिश्रमम् ।
तस्मादहं मुनिश्रेष्ठा कृपयैवानया सह ॥ १३६ ॥

आगतो भवतां देशं भिक्षमाणः क्षलेन तु ।
सर्ववेदान्तसर्वस्वं समादाय मुनीश्वराः ॥ १३७ ॥

---

१२९. –b) दे1 विमग्नानां (→निमग्नानां); दे3 शरीरिणा (→शरीरिणाम्).

१३१. –b) दे3* * * (→जायते). –d) दे3 भमते * नः (→भ्राम्यते जनः); दे2 चक्रव * * स्यते जनः.

१३२. –b) दे3 प्रायश्चित्तेन, +प्रायश्चित्तेन (→प्रायश्चित्तेन).

१३३. –b) दे1* * शुभं (→शुभाशुभं).

१३४. –b) दे2.3 सुव्रत (→सुव्रताः).

१३६. –c) दे2.3 °श्रेष्ठाः (→°श्रेष्ठा).

१३७. –a) दे2 अगज्ञो (→आगतो). –b) दे3 भिक्षमाणछलेन तु.
–c) दे3 * * स्वं (→सर्वस्वं). –d) दे1 स्वमादाय (→समादाय).

युष्मभ्यं कृपया दत्तं मया ज्ञानं विमुक्तिदम् ।
जन्मान्तरसहस्रेषु यज्ञदानादिभिर्द्विजाः ॥ १३८ ॥

नराणां क्षीणपापानां श्रद्धा मोक्षे प्रजायते ।
यज्ञास्तपांसि दानानि तीर्थसेवा जपो व्रतम् ॥ १३९ ॥

सर्वं लिङ्गार्चनाहीनं फलाय न भवेद् द्विजाः ।
सर्वेषामेव धर्माणां मल्लिङ्गाराधनं परम् ॥ १४० ॥

भवद्भिर्नार्चितं लिङ्गं चिरकालमिह द्विजाः ।
तस्मान्मोहो महान् जातो युष्माकं मुनयः पुरा ॥ १४१ ॥

ब्रह्मणो वचनाल्लिङ्गे भवद्भिरहमर्चितः ।
श्रीकालहस्तिनाथोऽपि दृष्टो युष्माभिरादरात् ॥ १४२ ॥

तेन पापानि दग्धानि युष्माकं सकलानि च ।
ज्ञानं च वाक्यजं लब्धं भवद्भिः करबिल्ववत् ॥ १४३ ॥

नास्तिकानां मनुष्याणामज्ञानान्धीकृतात्मनाम् ।
ज्ञानं न रोचते किञ्चिद् द्वेष एव हि जायते ॥ १४४ ॥

तस्माद् भवद्भिर्मुनिभिः परीक्ष्य भुवि मानवान् ।
दातव्यं ब्रह्मविज्ञानमिदमाम्नायवाक्यजम् ॥ १४५ ॥

आम्नायवाक्यजं ज्ञानं ज्ञानमित्युच्यते मया ।
अज्ञानमितरद् विप्राः फलतो मुक्तिसिद्धये ॥ १४६ ॥

---

१३९. –a) दे3 नाराणां (→नराणां). –d) दे1 जपोत्सवं (→जपो व्रतं).

१४०. –d) दे3 नल्लिंगा° (→मल्लिङ्गा°).

१४१. –c) दे3 महा– (→महान्).

१४२. –a) दे3 °लिं * (→लिंङ्गे) –c) दे2 श्रीकाल*स्ति °(→श्रीकालहस्ति°).

१४४. –a) दे3 मनुष्या * (→मनुष्याणां). –c) दे2 [से च] रोचते (→रोचते); दे3 किंच (→किञ्चिद्).

१४५. –b) दे3 मानयान् (→मानवान्).

१४६. –a) दे1 ज्ञान (→ज्ञानं). –b) दे1 मयां (→मया).

स्थापयध्वमिमं मार्गं वैदिकं मुनिपुंगवाः ।
अन्यथा नोपकाराय भवेद् ज्ञानं ममाज्ञया ॥ १४७ ॥

अवैदिकानि शास्त्राणि मयैव विहितानि तु ।
मूर्त्यन्तरं समास्थाय मोहनाय द्विजोत्तमाः ॥ १४८ ॥

महापापवतां नृणां तेषु वाञ्छा विजायते ।
नास्ति तेषां गतिर्विप्राः कल्पकोटिशतैरपि ॥ १४९ ॥

ततः समस्तैर्युष्माभिर्मार्गोऽयं वैदिकः परः ।
स्थापनीयः सदा भक्त्या हिताय जगतां द्विजाः ॥ १५० ॥

इत्येवमुक्ता मुनयः स्वमूर्ध्नि
श्रद्धातिरेकेण ममाङ्घ्रियुग्मम् ।
नत्वा निधायापि समाहितेन
चित्तेन मामात्मतयानुभूय ॥ १५१ ॥

विद्याबलेनैव मम प्रसादाद्
भक्त्या च वेदान्तविचारमार्गम् ।
त्यक्त्वाभिमाना भुवि संस्थिता सदा
चक्रुर्हितायाविलचेतनानाम् ॥ १५२ ॥

एवं ब्रह्मन् मुनिश्रेष्ठैः स्थापिते वैदिके विधौ ।
श्रीकालहस्तिशैलाख्यं महत्स्थानं गतो मुने ॥ १५३ ॥

---

१४७. –a) दे3 मार्ग (→मार्गं).

१४८. –b) दे3 मय्येव (→मयैव); दे2.3 च (→तु). –c) दे2.3 समादाय (→समास्थाय).

१४९. –a) दे3 ममहापापवमां नृणं.

१५१. –b) दे3 श्रद्धावि°(→श्रद्धाति°). –d) दे2 मा*त्म° (→मामात्म°); दे1 °भूप (→°भूय).

१५२. दे1. a b Θ. –b) दे2 विचर, दे3 विचा *(→विचार). –c) दे1 संस्थिताः, दे2.3 सुस्थिरं (→संस्थिता). –d) दे2 चक्रुर्हितायविल°, दे3 चक्रुर्हितायखिल° (→चक्रुर्हितायाविल°).

१५३. –c) दे2.3 °शैलाख्य (→°शैलाख्यं).–d) दे2.3 महं (→महत्); दे1 गता (→गतो).

केषांचिन्मुनिपुत्राणां मुनीनां भावितात्मनाम् ।
यथा मयोदितं ज्ञानं श्रुतमप्येनसा न तत् ॥ १५४ ॥

ते पुनर्दुःखिताः पुत्राः समालोक्य परस्परम् ।
श्रीकालहस्तिशैलाख्यं गत्वा भक्त्या समाहिताः ॥ १५५ ॥

सुवर्णमुखरीस्नानं माघमासे मघादिने ।
कृत्वा प्रदक्षिणीकृत्य प्रणम्य परमेश्वरम् ॥ १५६ ॥

पञ्चाक्षरेण मन्त्रेण भक्त्या संपूज्य नित्यशः ।
वत्सरान्ते पुनस्तस्यां नद्यां स्नानं प्रचक्रिरे ॥ १५७ ॥

श्रीकालहस्तिनाथोऽयं तेषामिष्टप्रसिद्धये ।
उमया मम पुत्राभ्यां नन्दिना वृषभेण च ॥ १५८ ॥

विष्णुना च विरिञ्चेन देवराजेन सुव्रत ।
मद्भक्तैरखिलैः सार्धं नद्यामस्यां मघादिने ॥ १५९ ॥

पर्वस्पृष्टे मुने माघे मासि स्नातास्तु ते पुनः ।
निवृत्तपापा मद्रूपं परमं परमर्षयः ॥ १६० ॥

ज्ञातवन्तः पुरा मत्तः श्रुतं स्मृत्वा परोक्षतः ।
पुनस्ते मुनयस्तस्मिन् देशे वेदविदां वर ॥ १६१ ॥

---

१५४. –a) दे$_{2}$ मुवि-(→मुनि-). –d) दे$_{3}$ श्रु* (→श्रुतं); दे$_{1}$ °प्येनसानत, + प्येनसारतो:, दे$_{3}$ °प्येन सा गमत् (→°प्येनसा न तत्).

१५६. –b) दे$_{2.3}$ °मासि (→°मासे).

१५७. –c) दे$_{3}$ तस्या (→तस्यां). –d) दे$_{3}$ स्नान (→स्नानं).

१५८. –a) दे$_{1}$ °नाथोऽहं (→°नाथोऽयं). –c) दे$_{2}$ उमम, (→उमया). –d) दे$_{1}$ नदिना (→नन्दिना).

१५९. –a) दे$_{3}$ विरिचैन (→विरिञ्चेन). –b) दे$_{1}$ सुव्रता । (→सुव्रत). –c) दे$_{3}$ मद्भक्तौ (→मद्भक्तै:); दे$_{3}$ सार्द्ध (→सार्धं).

१६०. –b) दे$_{2.3}$ स्नातोऽस्मि (→स्नातास्तु). –c) दे3 रूप (→रूपं).

१६१. –a) दे$_{1}$ ज्ञान °(→ज्ञात°). –d) दे$_{3}$ वर: (→वर).

ज्ञात्वा देशस्य माहात्म्यमवर्तन्तोऽनसूयवः ।
एवं विशिष्टे देशेऽस्मिन् यथाशक्ति ददाति यः ॥ १६२ ॥

स्वर्णं धान्यमथान्यद् वा स रुद्रो नात्र संशयः ।
अयं देशो ममाऽभीष्टो देव्याश्च मुनिसत्तम ॥ १६३ ॥

समन्ताद् योजनं ब्रह्मन् परिरक्षामि सर्वदा ।
अस्मिन् देशे मनुष्याणां मृतानां मुनिसत्तम ॥ १६४ ॥

न भूयो जन्म लोकेऽस्मिन् सत्यं सत्यं न संशयः ।
देशस्यास्य मुनिश्रेष्ठ मनसा वाप्युपद्रवम् ॥ १६५ ॥

उत्पादयन्ति ये मर्त्यास्तेषां पापफलं शृणु ।
रौरवादिषु सर्वेषु क्रमेण मुनिसत्तम ॥ १६६ ॥

नरकेषु महादुःखमनुभूयानुभूय च ।
कल्पकोटिशतं तेन नराः पापफलेन तु ॥ १६७ ॥

पैशाचं रूपमास्थाय वर्षाणामयुतं पुनः ।
भूयो विष्टासु जायन्ते कृमिरूपेण दुःखिताः ॥ १६८ ॥

ये पुनर्मानवा ब्रह्मन् देशस्यास्यैव रक्षकाः ।
ते पुनर्मरणादूर्ध्वं विमानं हैममद्भुतम् ॥ १६९ ॥

आरुह्य पुत्रमित्राद्यैः सह प्रीतास्तपोधन ।
इन्द्रलोके चिरं भुक्त्वा प्राजापत्ये च सुव्रत ॥ १७० ॥

---

१६२. –a) दे$_{2}$ वात्वा (→ज्ञात्वा). –b) दे$_{3}$ अर्वर्तन्तो (→अवर्तन्तो). –c) दे$_{3}$ * शिष्टे (→विशिष्टे ). –d) दे$_{2}$ °शक्त्या (→°शक्ति).

१६४. –c) दे$_{2}$ मनुष्याणो, दे$_{3}$ मुनुष्याणां (→मनुष्याणां). –d) दे$_{3}$ °सत्तमः (→°सत्तम).

१६५. –b) दे$_{2.3}$ सत्य (दे$_{3}$ °त्यं) सत्यं च नान्यथा. –d) दे$_{2}$ चाप्युपद्रव, दे$_{3}$ चाप्युप*व (→वाप्युपंद्रवम्).

१६७. –c) कल्पकोटि शते नापि.

१६९. –a) दे$_{1.3}$ मानुषा (→मानवा). –d) दे$_{3}$ विमान (→विमानं).

१७०. –a) दे$_{3}$ आरुह्य* * पुत्राद्यैः . –b) दे$_{2}$ प्रीतास्रतोपो °(→प्रीतास्तपो)°. –d दे$_{2}$ चे (→च).

विष्णुलोके पुनः साक्षाच्छिवलोके मया सह ।
सर्वान् भोगान् मुने भुक्त्वा यावद् विष्णुपदं पुनः॥ १७१ ॥

मत्प्रसादाच्च विज्ञानं लब्ध्वा मुक्ता भवन्ति हि ।
अनेन सदृशो देशो नास्ति लोकत्रयेष्वपि ॥ १७२ ॥

तस्माद् देशमिमं ब्रह्मन् रक्षयेच्छ्रद्धया सह ॥ १७३ ॥

इत्येतदुक्तं परमं रहस्यं
वसिष्ठ वेदान्तमहानिधानम् ।
श्रद्धाविहीनाय न देयमेतद् ।
भक्ताय देयं भवनाशनाय ॥ १७४ ॥

य इमं पठतेऽध्यायं श्रृणुयाद् वा दिने दिने ।
सर्वपापविनिर्मुक्तः सम्यग् ज्ञानं स गच्छति ॥ १७५ ॥

इत्युपपुराणे वासिष्ठलिङ्गे दशमोऽध्यायः ॥ १० ॥

---

१७१. –d) दे$_{2}$ °* * (→ °पदं).

१७३. –c) दे$_{2.3}$ धीमान् (→ब्रह्मन्). –d) दे$_{2}$ श्रद्धयो (→श्रद्धया).

**पुष्पिका–** दे$_{2.3}$ °लैंगे (→°लिंगे).

# ११

## ईश्वर उवाच*

पुरा ब्रह्मा जगत् सृष्ट्वा चिरकालं स्वभार्यया ।
रमयामास विश्वात्मा कामबाणेन पीडितः ॥ १ ॥

तस्यां तेन समुत्पन्नं पुत्राणामयुतत्रयम् ।
ते पुनः सूनवः कामात् प्रसह्य स्त्रीकुलं मुने ॥ २ ॥

दूषयामासुरत्यर्थं तेभ्यो जातास्तु राक्षसाः ।
राक्षसैस्तु जगत्सर्वं पीडितं क्रोधमूर्च्छितैः ॥ ३ ॥

ततः संभूय देवाश्च मुनयः शंसितव्रताः ।
ब्रह्माणं भार्यया सार्धं क्रीडमानं समागताः ॥ ४ ॥

प्रणम्य दडवद्र् भूमौ कृत्वा शिरसि चाञ्जलिम् ।
स्तोत्रैः प्रबोधयामासुः सुप्तं विष्णुमिवोदधौ ॥ ५ ॥

भगवन् भूतभव्येश भवसागरतारक ।
नमस्तुभ्यं जगन्नाथ नमः कमलसंभव ॥ ६ ॥

नमः सर्वजगत्पीडापरिहाररताय ते ।
नमो देवादिदेवाय देवदेवाय ते नमः ॥ ७ ॥

---

११

*दे$_{2}$ इश्वर उवाच

१. –b) दे$_{3}$ °काल (→°कालं); दे$_{2}$ स्वभार्यय (→स्वभार्यया). –c) दे$_{2}$ °* स (→°मास). –d) दे$_{3}$ °वाण्येन (→बाणेन).

२. –c) दे$_{2}$ * * * (→सूनवः). –d) दे$_{2.3}$ स्त्रीकुले (दे$_{3}$ °ल) (→स्त्रीकुलं).

३. –a) दे$_{2.3}$ द्वेषया° (→दूषया°). –c) दे$_{2.3}$ राक्षसैश्च (→राक्षसैस्तु).

४. दे$_{2}$. cd Θ. –a) दे$_{1}$ ततस्तेर्भूमिदेवाश्च. –b) दे$_{3}$ शांसितव्रता (→शंसितव्रताः) .

६. –b) दे$_{1}$.भवसंसार तारक, दे$_{2}$ भवसागरतांक (?). –d) दे$_{2.3}$ °संभवा (दे$_{3}$°वः) (→°संभव).

७. –a) दे$_{2}$ नमः सर्वगतपीडा. –b) दे$_{2}$ °रताये, दे$_{3}$° * ताय (→°रताय).

वेदवेद्याय वेदाय नमो वेदार्थदायिने ।
नमः पापवतां नृणां पापनाशनकारिणे ॥ ८ ॥

नमो रुद्राय शर्वाय विष्णवे परमेष्ठिने ।
सर्वाय सर्वगोप्त्रे च सर्वातीताय ते नमः ॥ ९ ॥

अनया रममाणेन भवता सह विस्मृतम् ।
रक्षणं जगतो देव राक्षसैः पीडिता वयम् ॥ १० ॥

भवन्तं शरणं भीताः प्रपन्ना वयमीश्वर ।
भगवन् कृपयैवास्माननुपालय दुःखितान् ॥ ११ ॥

इति विज्ञापितो ब्रह्मा देवैश्च मुनिसत्तमैः ।
क्षणात् कामात् प्रबुद्धोऽभूच्चिन्तयन् परमेश्वरम् ॥ १२ ॥

ततो देवानपि ब्रह्मा विलोक्य मुनिसत्तमान् ।
प्राह गम्भीरया वाचा भवद्भिस्त्यज्यतां भयम् ॥ १३ ॥

इत्युक्त्वा मुनिदेवेभ्यो ब्रह्मा सर्वजगत्पतिः ।
पुत्रमुत्पादयामास राक्षसारिं महाबलम् ॥ १४ ॥

तेन सर्वे हता ब्रह्मन् राक्षसा लोकबाधकाः ।
पुनर्ब्रह्मन् सुराः सर्वे ऋषयश्च तपोधनाः ॥ १५ ॥

अवर्तन्ताभयाः सर्वे स्वेच्छया मुनिसत्तम ।
एवं समाहिते लोके ब्रह्मा स्वात्मानमात्मना ॥ १६ ॥

---

१०. –c) दे$_1$ तक्षणं (→रक्षणं). –d) दे$_2$ राक्षसः (→राक्षसैः).

११. –b) दे$_{2.3}$ प्रपन्ना व (दे$_3$ * °) यमीश्वर (दे$_2$ °रं).

१३. –d) दे$_2$ भायं, दे$_3$ वयं (→भयम्).

१४. –a) दे$_2$ °देवभ्यो (→°देवेभ्यो).

१५. –c) दे$_2$ पुनर्व्रयुत्वाह्मन् (→पुनर्ब्रह्मन्); दे$_3$ पुनब्रह्मनुराः सर्वे.

१६. –a) दे$_1$ अवर्तन्ताभयाः स्वे स्वे. –b) दे$_2$ °सत्तमः (→°सत्तम); दे$_1$. स्थने वेदविदांवर.
–c) दे$_1$ समाहितो (→समाहिते). –d) दे$_2$ °मत्मना (→°मात्मना).

विलोक्य दूषयामास धिग् धिक् कामेन पीडितम् ।
अहो मोहस्य माहात्म्यं कः पुमान् लङ्घितुं क्षमः ॥ १७ ॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ १८ ॥

इत्थं संचिन्त्य विश्वात्मा ब्रह्मा ब्रह्मविदां वर ।
सात्त्विकं भावमास्थाय सह देव्या समाहितः ॥ १९ ॥

श्रीकालहस्तिशैलाख्यं स्थानं गत्वा जितेन्द्रियः ।
जटावल्कलसंयुक्तो भस्मोद्धूलितविग्रहः ॥ २० ॥

रुद्राक्षमालाभरणस्त्रिपुण्ड्राङ्कितमस्तकः ।
स्नानं त्रिषवणं कृत्वा सुवर्णमुखरीजले ॥ २१ ॥

शाकमूलफलाहारः पादाङ्गुष्ठाग्रविष्ठितः ।
ऊर्ध्वबाहुर्निरालम्बो दृढचित्तश्च निर्भयः ॥ २२ ॥

श्रीकालहस्तिशैलेशं वीक्ष्यमाणो महामुने ।
श्रीमत्पञ्चाक्षरं मन्त्रं सतारं सर्वदा जपन् ॥ २३ ॥

दिव्यं वर्षसहस्रं तु चचार परमं तपः ।
एवं चचार भार्या च तपस्तस्य महात्मनः ॥ २४ ॥

ततो प्रीतोऽभवं ब्रह्मन्नतीव तपसा तयोः ।
मम भार्या च सुप्रीता ब्रह्मन् गिरिवरात्मजा ॥ २५ ॥

पुनर्मां प्रार्थयामास ब्रह्मा देवीं च भार्यया ।
धार्मिकं कृपयोपेतं कृतकृत्यं जितेन्द्रियम् ॥ २६ ॥

---

१७. –b) दे$_{2.3}$ धिक् (→धिग्).
१९. –a) दे$_{2}$ इत्थं संचि* * * त्मा. –d) दे$_{3}$ स्वमाहित (→समाहितः).
२१. –a) दे$_{3}$ भरणी (→भरणस्). –c) दे$_{2.3}$ च विधिवत् (→त्रिषवणं).
२२. –b) दे$_{1}$ °धिष्ठितः (→°विष्ठितः). –d) दे$_{2}$ निर्भय, दे$_{3}$ निभयः (→निर्भयः).
२३. –b) दे$_{3}$ वीक्ष° (→वीक्ष्य°). –c) दे$_{3}$ पंचाक्षर (→पंचाक्षरं).
२४. –a) दे$_{2.3}$ दिव्य (→दिव्यं). –b) दे$_{2}$ रचार (→चचार); दे$_{3}$ * * मं (→परमं).
२५. –a) दे$_{2.3}$ ततः (→ततो); दे$_{1}$ [ अ ] भवं,+ [ अ ] भवद् (→[ अ ] भवं). –b) दे$_{3}$ °नृतीव्र (→°नतीव); दे$_{2}$ पतयोः (→तयोः).
२६. –b) दे$_{3}$ देवी (→देवीं). –c) दे$_{2}$°* तं (→ °पेतं).

सम्यग् ज्ञानेन संपूर्णं पुत्रमिच्छामि ईश्वर ।
इत्येवं प्रार्थितो धात्रा सभार्येणाहमम्बया ॥ २७ ॥

सह प्रीतो वरं पुत्रं सम्यग् ज्ञानेन संयुतम् ।
ऋभुसंज्ञं विरिञ्चाय दत्तवानस्मि सुव्रत ॥ २८ ॥

ऋभुं पुत्रं पुनर्ब्रह्मा स्वमालिङ्ग्य स्वभार्यया ।
कृतार्थो मत्प्रसादेन जितकामो जगत्पतिः ॥ २९ ॥

पुनश्च प्रार्थयामास देवं तत्रैव सुव्रत ।
माघमासे मघर्क्षे यः पुमान् श्रद्धासमन्वितः ॥ ३० ॥

सुवर्णमुखरीस्नानं कृत्वा दत्त्वा यथाबलम् ।
श्रीकालहस्तिनाथाय विदुषे च द्विजातये ॥ ३१ ॥

कृत्वा प्रदक्षिणं भक्त्या देवदेवं त्रियम्बकम् ।
अष्टोत्तरशतं ब्रह्मन् दिवा वर्जितभोजनः ॥ ३२ ॥

देहि पुत्रं ममेशान एवं प्रार्थयते सुतम् ।
तस्य पुत्रं प्रयच्छ त्वं प्रार्थनैषा ममाव्यय ॥ ३३ ॥

एवं संप्रार्थितो यत्र देवदेवो महेश्वरः ।
प्राह देवीं समालोक्य ब्रह्माणं मुनिपुंगव ॥ ३४ ॥

यः पुमान् मासि मासीत्थं मघर्क्षे कुरुते व्रतम् ।
माघमासं समारभ्य सोऽब्दात् पुत्रमवाप्नुयात् ॥ ३५ ॥

एवं भक्त्या व्रतं नारी नरो वा कुरुतेऽत्र यः ।
तस्य दारिद्र्यनाशः स्याद् वत्सरान्मत्प्रसादतः ॥ ३६ ॥

धनार्थी वित्तमाप्नोति जयार्थी जयमाप्नुयात् ।
वश्यार्थी वश्यमाप्नोति राज्यार्थी राज्यमाप्नुयात् ॥ ३७ ॥

---

२७. –a) $दे_3$ सम्य (→सम्यग्). –b) $दे_3$ इछति (→इच्छामि). –c) $दे_3$ रत्येवं (→इत्येवं).

२८. –b) $दे_2$ सयुतं (→संयुतम्). –c) $दे_3$ °संज्ञ (→°संज्ञं). –d) $दे_{2.3}$ सुव्रतं (→सुव्रत).

३६. –b) $दे_3$ चा (→वा). –d) $दे_1$ वत्सरात्, $दे_3$ वत्सारान् (→वत्सरान्); $दे_2$ प्रमादरः (→प्रसादतः).

रोगार्तो मुच्यते रोगान्मोक्षार्थी मोक्षमाप्नुयात् ।
विद्यार्थी लभते विद्यां सुखार्थी लभते सुखम् ॥ ३८ ॥

अस्मिन् देशे मनुष्याय यस्मै कस्मै ददाति यः ।
आवासं भुवमन्यद्वा स याति परमां गतिम् ॥ ३९ ॥

अस्मिन् देशे हुतं दत्तं तपः स्वाध्यायकर्म च ।
अणुमात्रमपि ब्रह्मन् मेरुणा सदृशं भवेत् ॥ ४० ॥

इत्युक्त्वा ब्रह्मणे ब्रह्मन् महादेवो महेश्वरः ।
तत्रैवान्तर्हितः सोमः सोमार्धकृतशेखरः ॥ ४१ ॥

ब्रह्मा नद्यां पुनः स्नात्वा स्थानेऽस्मिन्नम्बिकापतिम् ।
प्रदक्षिणत्रयं कृत्वा स्तुत्वा स्तोत्रैः स्वभार्यया ॥ ४२ ॥

ब्रह्मलोकमनुप्राप्तो ब्रह्मा देवैः समावृतः ।
ऋभुश्चोत्पन्नविज्ञानो निसर्गादिव सत्तम ॥ ४३ ॥

दिव्यवर्षायुतं ब्रह्मंश्चचार पृथिवीमिमाम् ।
जन्मान्तरकृतात्पापान्नास्तिकाः सर्वजन्तवः ॥ ४४ ॥

ऋभुं प्रेक्ष्यापि तत्त्वज्ञमुपेक्षां चक्रिरे भृशम् ।
सोऽपि स्वात्मनि संतुष्टो निर्द्वन्द्वो निष्परिग्रहः ॥ ४५ ॥

कृपया परया युक्तो विद्यानुच्छित्तिसिद्धये ।
शिष्यं शिष्यगुणोपेतं प्रार्थयामास सुव्रत ॥ ४६ ॥

---

३९. –a) $दे_2$ देश (→देशे). –b) $दे_3$ * * (→कस्मै). –d) $दे_2$ गतिः (→गतिम्).

४०. –a) $दे_3$ हुत (→हुतं). –c) $दे_3$ व्रजन् (→ब्रह्मन्). –d) $दे_2$ सदृश (→सदृशं).

४२. –b) $दे_3$ स्थैनेस्मिन्नविकः पति. –d) $दे_2$ स्तोनैः (→स्तोत्रैः).

४३. –a) $दे_3$ °प्राप्ता (→°प्राप्तो). –b) $दे_3$ सदावृतः (→समावृतः).

४४. –a) $दे_3$ व्रह्मन् (→ब्रह्मंश्-).

४५. –a) $दे_2$ ऋर्भु (→ऋभुं); $दे_{2.3}$ दृष्ट्वापि (→प्रेक्ष्यापि); $दे_1$ तत्वज्ञ (→तत्वज्ञं). –d) $दे_3$ निर्द्वं * (→निर्द्वंदो).

४६. –a) $दे_3$ कृतया (→कृपया).

यथापः पर्वता?द्रुयन्ति यथा मासा अहर्जरम् ।
एवमाश्रोतुकामाश्च धातरायन्तु सर्वतः ॥ ४७ ॥

इत्येवं प्रार्थिते शिष्ये विद्यानुच्छित्तिसिद्धये ।
जन्मान्तरकृतात्पुण्यान्मत्प्रसादाच्च सुव्रत ॥ ४८ ॥

पुलस्त्यपुत्रो धर्मिष्ठो निदाघाख्यो गृहाश्रमी ।
ऋभुं दृष्ट्वा महाप्रीतः प्रणिपत्यात्मवेदिनम् ॥ ४९ ॥

भोजयित्वा द्विजं प्राह प्रसादं कुरु मे द्विज ।
इत्युक्तो ब्राह्मणेनासौ निदाघेन मुनीश्वर ॥ ५० ॥

ऋभुः श्रद्धातिरेकेण प्रोवाच ज्ञानमुत्तमम् ।
यस्मादिमानि जायन्ते भूतानि भुवनानि च ॥ ५१ ॥

येन जातानि जीवन्ति लीयन्ते यत्र च द्विज ।
विजिज्ञासस्व वेदान्तैर्ब्रह्मैतत् सततं मुदा ॥ ५२ ॥

तद् ब्रह्मेदं जगत् सृष्ट्वा प्राप्य जीवात्मना जगत् ।
सच्चस्यच्चाभवच्छक्त्या (?) निरुक्तं चापि हि द्विज ॥ ५३ ॥

अनिरुक्तं च विप्रेन्द्र तथा निलयने रतम् ।
विज्ञानं चाभवत् तद्वदविज्ञानं द्विजोत्तम ॥ ५४ ॥

सत्यानृतं च बहुना किमुक्तेन द्विजोत्तम ।
यदिदं दृश्यते दृष्ट्या श्रूयते श्रवणेन च ॥ ५५ ॥

---

४७. –a) दे$_1$ सर्वतो, + प्रवता, दे3 प्रवता° (→पर्वता°). दे$_2$ °वेंति (→°यन्ति). –b) दे$_1$ मासां (→मासा). –c) दे$_1$ °कमाश्च (→°कामाश्च). –d) दे$_1$ °रायत (→°रायन्तु).

४८. –a) दे$_3$ पार्थिते (→प्रार्थिते). –b) दे$_3$ विद्य° (→ विद्या°). –d) दे$_3$ सु*त (→सुव्रत).

५०. –c) दे$_3$ * त्युक्तो (→इत्युक्तो). –d) दे$_2$ निदायन (→निदाघेन).

५१. –a) दे$_3$ ऋभु (→ऋभुः).

५२. –b) दे$_{2.3}$ लीयते (→लीयन्ते); दे$_3$ द्वि * (→द्विज). –c) दे$_2$ विजज्ञां° (→विजिज्ञां°); दे$_1$ विजिज्ञाः सर्व वेदान्तैर्. –d) दे$_1$ ब्रह्मेति (→ब्रह्मैतत्); दे$_1$ द्विज (→मुदा).

५३. –c) दे$_1$ सच्चत्य° (→सच्चस्य°); दे$_3$ सच्चत्यच्चाभवछत्मा. –d) दे$_1$ य (→हि).

५४. –a) दे$_3$ विपेन्द्र (→विप्रेन्द्र). –b) दे$_3$ तरं (→रतम्). –c) दे$_{2.3}$ अभव (→अभवत्); दे$_2$ तद्ब°, दे3 तद्वद्(→तद्वद्). दे3 विज्ञानं च द्विजोत्तम.

५५. –b) दे$_2$ उक्तन (→उक्तेन). –c) दे$_3$ यदि * (→यदिदं).

गृह्यते मनसा चान्यैस्तत् सर्वं ब्रह्म केवलम् ।
कोशमन्नमयं भातमात्मात्मवन्माययैव तम् ॥ ५६ ॥

स्वप्नदेहमिवासत्यमिति विद्धि विलक्षणम् ।
प्राणापानादिभेदेन विभिन्नो भाति ते द्विज ॥ ५७ ॥

योऽयं प्राणमयः कोशः सोऽयं मायाविजृम्भितः ।
संकल्पं च विकल्पं च कुरुते सत्यवत् सदा ॥ ५८ ॥

योऽयं मनोमयः कोशः स नास्तीत्यवबुध्यताम् ।
निश्चिनोति सदा योऽर्थं निदाघ परमार्थवत् ॥ ५९ ॥

विज्ञानमयकोशो यः स नास्तीत्यवबुध्यताम् ।
सुख्यहं दुःख्यहं ज्ञाता कर्ता भोक्तेति भाति यः ॥ ६० ॥

आनन्दमयकोशो यः स नास्तीत्यवबुध्यताम् ।
सत्यं ज्ञानमनन्तं यद् ब्रह्मानन्दं श्रुतौ श्रुतम् ॥ ६१ ॥

तद्विद्धि हृदये भातं प्रत्यङ्मात्रमिति द्विज ।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ॥ ६२ ॥

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परात्मनि ।
वाचा नह्युदितं यच्च येन वाग्वदति द्विज ॥ ६३ ॥

तद् ब्रह्म त्वं सदा विद्धि नेदं वाग्विषयं न वाक् ।
मनसा यन्न गृह्येत येनैवाहुर्मनो मतम् ॥ ६४ ॥

---

५६. –b) दे$_2$ सर्व (→सर्वं); दे$_2$ कवलम् (→केवलम्). –d) दे$_1$ आत्मवर्त्मायएव तम्, दे$_2$ प्रात्मवन्माययैव तं.

५७. –b) दे$_{2.3}$ विच (दे$_3$ °व) क्षण (→विलक्षणम्).–d) दे$_1$ भान्ति (→भाति); दे$_2$ द्विजा (→द्विज).

५८. –b) दे$_3$ सोय (→सोऽयं); दे$_2$ °विजम्भितः (→°विजृम्भितः).

५९. –a) दे$_{2.3}$ सोऽयं (→योऽयं)

६०, –a) दे$_{2.3}$ यं (→यः). –d) दे$_2$ कर्ता भोक्ते कृतितियः.

६१. –a) दे$_2$ अनंद° (→आनन्द°); दे$_{2.3}$ यं (→यः). –d) दे$_1$ °नन्द (→°नन्दं).

६२. –a) दे$_2$ मानं, दे$_3$ मातं (→भातं). –b) दे$_3$ इ * (→इति). –c) दे$_2$ हृदय°, दे$_3$ हृ * य (→हृदय°).

६३. –c) दे$_3$ वाचानभ्युद्यतेदितं यच्चे.

६४. –a) दे$_3$ विद्धिर् (→विद्धि). –d) दे$_2$ °मने (→°मनो).

तद् ब्रह्म त्वं सदा विद्धि न मनश्च मनोमतम् ।
यच्चक्षुषा न गृह्येत येन चक्षुश्च गृह्यते ॥ ६५ ॥

तद् ब्रह्म त्वं सदा विद्धि नेदं दृष्ट्याऽभिवीक्षितम् ।
श्रूयते न सदा विप्र यच्छ्रोत्रेणेन्द्रियेण तु ॥ ६६ ॥

तद् ब्रह्म त्वं सदा विद्धि नेदं श्रोत्रं श्रुतं द्विज ।
यच्च न प्राणिति प्राणो येन प्राण प्रणीयते ॥ ६७ ॥

तद् ब्रह्म त्वं सदा विद्धि नेदं प्राणविचेष्टितम् ।
यद् विज्ञातं त्वया विप्र यन्न विज्ञातमात्मना ॥ ६८ ॥
ताभ्या मन्यत्परं विद्धि विद्धि वेदांत वाक्यजम् ॥

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलश्चेति विद्धि ॥ ६९ ॥

न भाति सूर्यो न च तारकं शशी
न भाति विद्युन्न च भाति पावकः ।
प्रकाशमाने परमात्मवस्तुनि
प्रभाति सर्वं परमात्मना सदा ॥ ७० ॥
शरीरमेवाशनमत्ति सर्वदा
न चात्मतत्त्वं परमार्थदर्शने ।
करोति सर्वत्र निदाघ मारुतः
शरीरगो नैव पुमानविक्रियः ॥ ७१ ॥

---

६५. –b) दे$_1$ न मनो विषयं मनः. –d) दे$_2$ येव (→येन).

६६. –a) दे$_2$ ब्रह्मत्वं च (→ब्रह्म त्वं); दे$_3$ विद्ध (→विद्धि). –d) दे$_1$ यः श्रौत्रेणे° (→यच्छ्रोत्रेणे°).

६९. –a) दे$_{2\text{-}3}$ विप्र (→विद्धि). –b) दे$_{2.3}$ विद्धि वैद्यंत वाक्यतः. –e) दे$_2$ °भूतादि° (→°भूताधि°). –f) दे$_{2.3}$ साक्षाच्चेता (→साक्षी चेता); दे$_2$ विद्धिः (→विद्धि).

७०. –a) दे$_1$ भांति (→भाति). –b) दे$_1$ भांति (→भाति); दे$_2$ भावि (→भाति). –d) दे$_3$ सर्व (→सर्वं); दे$_1$ प्रभाति सर्वं परमात्मवस्तुता.

७१. –b) दे$_3$ °नात्व (→°तत्वं); दे$_3$ °दर्शनै (→°दर्शने). –d) दे$_2$ शरीरगै (→शरीरगो).

देहात्मप्रविभागबोधममलं तर्कैः सदा बृंहितम्
संन्यासाश्रमशान्तिदान्तिसहितैर्यज्ञादिदग्धैनसैः ।
संपाद्यं श्रुतिमस्तकेषु महता यत्नेन विद्यां विना
कः संसारमविद्ययैव निहितं छित्त्वा विमुक्तो भवेत् ॥ ७२ ॥

यद् ज्ञानेन निदाघ दृश्यमखिलं विज्ञानमेतादृशं
मृत्पिण्डेन घटादिवद् भवति तत् सत्यं ततोऽन्यन्मृषा ।
स त्वं विद्धि महाबलेन सततं भक्त्या च मत्सेवया
न त्वं संसरसि श्रुतिश्च सदसीत्युच्चैर्मुदा वक्ति हि ॥ ७३ ॥

एतावाञ्छ्रुतिमस्तकैरभिहितो ह्यर्थो निदाघादरात्
एतावान् विदितो मया मुनिगणैरन्यैरपि ज्ञानिभिः ।
एतावत् परमेश्वरो वदति मे विष्णुर्विरिञ्चोऽप्यतः
कारुण्यादहमुक्तवानतितरां विद्ध्येनमर्थं मुदा ॥ ७४ ॥

इति ब्रह्मसुतो ब्रह्मन् विद्यानुच्छित्तिसिद्धये ।
निदाघायोक्तवांस्तत्त्वं तत्पुनस्तेन विस्मृतम् ॥ ७५ ॥

निदाघस्याल्पभाग्यस्य न विद्यावासनाऽभवत् ।
प्रतिबन्धकबाहुल्यात् प्रवृत्ता कर्मवासना ॥ ७६ ॥

अतीते वत्सरे दिव्ये सहस्रे स ऋभुः पुनः ।
निदाघस्य गृहं गत्वा द्वारि केवलमास्थितः ॥ ७७ ॥

---

७२. –a) दे$_1$ देहात्मा° (→देहात्म°) दे$_{2.3}$ तर्के (→तर्कैः); दे$_3$ तदा (→सदा). –b) दे$_2$ °नसै (→°नसैः). –d) दे$_1$ निहतं (→निहितं).

७३. –a) दे$_2$ निदाव दृश्य°, दे$_3$ विद्या दृश्य° (→निदाघ दृश्य°); दे$_1$ °ममलं (→°मखिलं). –b) दे$_2$ घटादि * * * ति (→घटादिवद् भवति). –d) दे$_1$ तत्वं (→न त्वं); दे$_3$ सदसी त्यूच्चेर्मुदा, दे$_2$ सवसीत्युच्चैर्मदा (→सदसीत्युच्चैर्मुदा).

७४. –a) दे$_3$ एताबछुति° (→एतावाञ्छ्रुति); दे$_{2.3}$ प्यर्थो (→ह्यर्थो). –b) दे$_{2.3}$ एतावद् (→एतावान्); दे$_3$ मुनिग * * ण्यै° (→मुनिगणैरन्यै)°. –c) दे$_3$ परमेश्वरा (→परमेश्वरो); दे$_2$ विष्णुविंरिच्योप्यतः (→विष्णुर्विरिञ्चोप्यतः). –d) दे$_3$ अर्थ (→अर्थं).

७६. –a) दे$_1$ भावस्य (→°भाग्यस्य). –b) दे$_1$ [अ] भवेत् (→[अ] भवत्). –c) दे$_3$ प्रतिवं * क° (→प्रतिबन्धक° ).

७७. –c) दे$_1$ निन्दाघस्य (→निदाघस्य). –d) दे$_1$ केवलवत्° (→केवलमा°).

निदाघस्तं समालोक्य प्रणिपत्य स्वभार्यया ।
भोजयित्वोपचारेण पृष्टवान् कुत आगतः ॥ ७८ ॥

क्व च गन्ता भवान् तृप्तिर्भोजनादस्ति वा न वा ।
इति पृष्टो निदाघेन स ऋभुः प्राह सत्तम ॥ ७९ ॥

आकाशवदहं पूर्णो देहपादादिवर्जितः ॥
गमनागमने न स्तः क्षुत्पिपासे च मे न हि ॥ ८० ॥

त्वं दृष्ट्वा देहसद्भावो गमनागमने तथा ।
क्षुत्पिपासे च मां दृष्ट्वा नश्येते परमार्थतः ॥ ८१ ॥

इति श्रुत्वा निदाघोऽपि मां स दृष्ट्यावलोकयन् ।
प्राह मिथ्या कथं प्रोक्तं भवता मम संनिधौ ॥ ८२ ॥

प्रत्यक्षेण विजानामि शरीरगमनं तथा ।
भोजनं मैथुनं नाशं तवाहं पुरुषाधम ॥ ८३ ॥

गच्छ गच्छ महादुष्ट सत्यहीन ममाग्रतः ।
सत्यहीना नराः सर्वे पच्यन्ते नरकालये ॥ ८४ ॥

सत्यहीनैः सहाश्वासः सहवासश्च दर्शनम् ।
नराणां नरकायोक्तं मुनिभिः सूक्ष्मदर्शिभिः ॥ ८५ ॥

---

७८. –a) दे$_1$ निंदाघ्यस्तं (→निदाघस्तं). –c) दे$_3$ उप [ र ] चारेण (→उपचारेण). –d) दे$_1$ आगतं (→आगतः).

७९. –a) दे$_2$ कं (→क्व). –c) दे$_1$ निंदाघ्येन (→निदाघेन). –d) दे$_3$ सत्तमः (→सत्तम).

८०. –b) दे$_1$ दह,+ हस्त° (→देह°).

८१. –a) दे$_1$ तं, दे$_2$ त्त्वा, दे$_3$ त्व (→त्वं); दे$_2$ द्दृष्ट्या (→दृष्ट्वा); दे$_{2.3}$ °वद्भावो (→°सद्भावो). –c) दे$_{2.3}$ म (→मां); दे$_2$ द्दृट्या (→दृष्ट्वा). –d) दे$_{2.3}$ नास्त्यव (→नश्येते).

८२. –a) दे$_1$ दृष्ट्वा (→श्रुत्वा); दे$_1$ निंदाघ्योऽपि (→निदाघोऽपि).

८३. –c) दे$_3$ भोजन (→भोजनं). –d) दे$_2$ तवाह (→तवाहं).

८४. –b) दे$_1$ °हीनं (→°हीन). –c) दे$_2$ नरः (→नराः).

८५. –a) दे$_2$ सत्यहीनौः (→सत्यहीनैः). –c) दे$_3$ नराः णां (→नराणां). –d) दे$_2$ °दर्शीभिः, दे$_3$ °दर्शिभि (→°दर्शिभिः).

इत्युक्तो ब्रह्मपुत्रश्च निदाघेन मुनीश्वराः ।
पुनश्चाहात्मविज्ञानमलभ्यमिति चिन्तयन् ॥ ८६ ॥

विप्र विप्र निदाघात्र प्रत्यक्षं कं ब्रवीषि तत् ।
विमृश्य वद मे विद्वन् सत्यनिष्ठ नरोत्तम ॥ ८७ ॥

इति ब्रह्मसुतेनोक्तो निदाघोऽप्याह पूर्ववत् ।
पुनश्च परया युक्तः कृपया स ऋभुर्मुनिः ॥ ८८ ॥

निदाघायोक्तवांस्तत्त्वं शिष्यस्नेहादहं यथा ।
यद्यत् प्रकाशते विद्वन् तत्तद् भानात्मकं न वा ॥ ८९ ॥

भानात्मकं चेद् ब्रह्मैव कथं देहादिदर्शनम् ।
अथ भानात्मकं तर्हि प्रत्यक्षेण न भाति तत् ॥ ९० ॥

भानसंबन्धतो भातमपि विद्वन् न सिध्यति ।
स्वतो भानविहीनश्च कथं भानेन संगतिः ॥ ९१ ॥

तस्मात् प्रत्यक्षतो दृष्टं ब्रह्मैवात्र विचारतः ।
अविचारात्मिका ह्येषा प्रतीतिः प्रतिभाति ते ।
विचारेण विसृज्यैतां ब्रह्म सर्वं विलोकय ॥ ९२ ॥

इत्येवमुक्त्वा स ऋभुर्महात्मा
मम प्रसादत्प्रतिलब्धबोधः ।
अनाकुलः स्वात्मनि तुष्टभावो
न किञ्चिदप्याह पुनर्वसिष्ठ ॥ ९३ ॥

---

८६. –b) दे$_2$ मुनीश्वर, दे$_3$ मु [न्न] नीश्वर (→मुनीश्वराः); दे$_1$ निंदाद्येन मुनीश्वर. –c) दे$_3$ °श्राहात्म–(→°चाहात्म–). –d) दे$_2$ चिन्तयना (→चिन्तयन्).

८७. –a) दे$_1$ निंदाद्यात्र, दे$_3$ निदाघात्म (→निदाघात्र). –b) दे$_{2.3}$ किं (→कं). –d) दे$_3$ नरोत्तमः (→नरोत्तम).

८८. –b) दे$_1$ निंदाद्यो° (→निदाघो°). –d) दे$_3$ सन् (→स), दे$_2$ मुनि (→मुनिः).

८९. –a) दे$_1$ निंदाद्यायोक्त; दे$_2$ निदायस्योक्त, दे$_3$ निदघस्योक्त (→निदाघायोक्त). –b) दे$_2$ अयं, दे$_3$ अह (→अहं). –c) दे$_1$ विद्धि (→विद्वन्).

९०. –b) दे$_2$ दर्शन (→दर्शनं). –c) दे$_2$ अथा (→अथ).

९१. –a) दे$_2$ भानं (→ भातं). –b) दे$_3$ विद्वेन् (→ विद्वन्). –c) दे$_3$ विहीनस्य (→ विहीनश्च). –d) दे$_2$ संगितिः (→ संगतिः ).

९२. –a) दे$_2$ प्रत्यक्षरो (→ प्रत्यक्षतो); दे$_{2.3}$ दृष्ट (→ दृष्टं). –e) दे$_3$ विसृज्यैता (→ विसृज्यैतां).

९३. –b) दे$_{2.3}$ परिलब्ध (→ प्रतिलब्ध). –c) दे$_{2.3}$ अनाकु (दे$_3$ °क) ल (→ अनाकुलः).

निदाघश्च वचः श्रुत्वा ब्रह्मपुत्रस्य धीमतः ।
प्रदक्षिणत्रयं कृत्वा पपात भुवि दण्डवत् ॥ ९४ ॥

तस्य भार्या मुनिश्रेष्ठ प्रणिपत्य पतिव्रता ।
गन्धपुष्पादिभिर्ब्रह्मन् पूजयामास सादरम् ॥ ९५ ॥

तं निदाघः समालिङ्ग्य पुनश्चाह द्विजोत्तम ।
को भवानिह सर्वज्ञो मम गेहे समागतः ॥ ९६ ॥

दर्शनात् तव संतुष्टिर्जाता मे महती द्विज ।
इत्युक्तो ब्रह्मविच्छ्रेष्ठो निदाघेनार्द्रमानसः ॥ ९७ ॥

ऋभुस्तवाहमाचार्यः पुरस्तादेव तेऽनघे ।
इदानीमागतो विद्या मयोक्ता सुस्थिता न वा ॥ ९८ ॥

इति जिज्ञासया वत्स गमिष्यामि यथेच्छया ।
त्वं च कर्म परित्यज्य मदुक्तार्थपरो भव ॥ ९९ ॥

इत्युक्त्वा मौनमास्थाय ब्रह्मवित्प्रवरोऽगमत् ।
निदाघश्च तथेत्युक्त्वा प्रणिपत्य द्विजोत्तम ॥ १०० ॥

अन्वगच्छन्मुने कंचिद् देशं भक्त्या स्वभार्यया ।
एवं ब्रह्मसुतेनोक्तो निदाघोऽपक्वमानसः ॥ १०१ ॥

पुनश्च कर्मनिष्ठोऽभूत् सर्वदा मुनिसत्तम ।
पुनः संवत्सरेऽतीते सहस्रे दैविके तदा ॥ १०२ ॥

---

९४. –a) दे$_1$ निंदाघश्च (→ निदाघश्च).

९६. –a) दे$_1$ निंदाद्यः (→ निदाघः).

९७. –a) दे$_{2.3}$ एव (→ तव). –b) दे$_3$ °जा * (→ °जाता). –d) दे$_2$ °मानस (→ °मानसः).

९८. –d) दे$_2$ मतोक्ता (→ मयोक्ता).

९९. –a) दे$_2$ विज्ञासया (→ जिज्ञासया); दे$_3$ वत्सर् (→ वत्स). –b) दे$_3$ गामेष्यामि (→गमिष्यामि).

१०१. –a) दे$_1$ अन्वा° (→ अन्व°). –d) दे$_1$ °यष्टु °(→ [ °अ ] पक्व°).

१०२. –d) दे$_2$ तव, दे$_3$ नह (→ तदा).

ऋभुर्दत्त्वा परिज्ञानं निदाघायादरेण तु ।
निर्वाणं परमं ब्रह्मन्नवाप परमामृतम् ॥ १०३ ॥

निदाघो दग्धपापस्तु विशुद्धहृदयो द्विज ।
ब्रह्मपुत्रोपदेशेन प्रबुद्धः परमात्मनि ॥ १०४ ॥

बुद्ध्वा मायामयं सर्वं त्यक्त्वा वर्णाश्रमं सदा ।
प्रारब्धकर्मणा किञ्चित् कालं स्थित्वा शरीरके ॥ १०५ ॥

भुक्त्वा भोगानविद्योत्थानाभासानात्मनि स्थितान् ।
तदन्ते विद्ययाऽविद्यां दग्ध्वा मुक्तोऽभवत् स्वयम् ॥ १०६ ॥

इत्युक्तं परमहितं जगद्धिताय
श्रुत्युक्तं परमपदं महानुभाव ।
प्रत्युक्तं द्विज ऋभुणा विमुक्तये
यच्छिष्यं परममुदा वसिष्ठ भक्त ॥ १०७ ॥

इत्युपपुराणे वासिष्ठलिङ्गे एकादशोऽध्यायः ॥ ११८ ॥

---

१०३. –a) दे$_2$ परिज्ञान (→ परिज्ञानं). –b) दे$_2$ निदावाघा, °दे$_3$ * दाघाया° (→निदाघाया°). –c) दे$_2$ ब्रह्म ( ब्रह्मन्). –d) दे$_2$ भवाय (→ नवाप); दे$_2$ °अमृतां (→ °अमृतं).

१०४. –a) दे$_1$ निंदाघो (→ निदाधो). –c) दे$_2$ ब्रह्मपुत्रौ, दे$_3$ ब्रह्मपुत्रै° (→ ब्रह्मपुत्रो°).

१०६. –a) दे$_2$ °विद्योत्कानं° (→ °विद्योत्थाना°).

१०७. –a) दे$_2$ इत्युक्त (→ इत्युक्तं). –b) दे$_2$ महानुभावां (→ महानुभाव). –c) दे$_{2.3}$ गुरुणा (→ ॠभुणा). –d) दे$_{1.3}$ भक्त (→ शिष्य).

१०७. श्लोकानन्तरं दे 1 हस्तलेखे अधिकम्–
परमकारुणिकेन परेश्वरेणं भगवंतैव शिष्टं प्रति कथित वाशिष्ट छ .

**पुष्पिका–** °लैंगे (→ °लिंगे).

# १२

## ईश्वर उवाच

पुरा काश्मीरदेशे तु वृषलोऽतीव निर्घृणः ।
पुनश्च सर्वजन्तू नामनिष्टमकरोद् द्विज ॥ १ ॥

जन्मान्तरकृतात् पुण्यादध्वश्रान्तं मुनीश्वरम् ।
शिवयोगिनमायान्तं दृष्ट्वा सोऽपि मुदान्वितः ॥ २ ॥

प्रणिपत्य महात्मानं पादौ प्रक्षाल्य वारिणा ।
पादोदकं मुदा पीत्वा दत्त्वा यावकमोदनम् ॥ ३ ॥

अकरोद् गात्रशुश्रूषां भार्यया सह सुव्रत ।
ततः प्रसन्नो योगीन्द्रः स्वात्मतत्त्वे च संस्थितः ॥ ४ ॥

महाकारुणिकः श्रीमान् वृषलं प्रत्यभाषत ।
अहं तुष्टोऽस्मि सच्छूद्र भक्त्या तेन हितं तव ॥ ५ ॥

वक्ष्यामि शृणु तच्छूद्र सहितो भार्यया सह ।
मच्छुश्रूषावलाद् दग्धं तव पापं महत्तरम् ॥ ६ ॥

श्रीकालहस्तिशैलाख्यं स्थानं गच्छातिवेगतः ।
इत्युक्त्वा सोऽगमद् ब्रह्मन् शिवयोगी महामतिः ॥ ७ ॥

ततः सभार्यो वृषलः संतुष्टोऽतीव सत्तम ।
सुवर्णमुखरीं दृष्ट्वा दण्डवत् प्रणिपत्य च ॥ ८ ॥

---

१२

* दे$_3$ ईश्वर उ* च ।

१. –c) दे$_2$ जंकृताम् (→ जन्तू नाम्). –d) दे$_3$ द्विजा (→ द्विज).

२. –d)दे$_1$ मुदान्विता (→ मुदान्विताः).

६. –b)दे$_3$ भार्यमाया (→ भार्यया); दे$_2$ सहा (→ सह).–c). दे$_3$ * छुश्रूषा (→ मच्छुश्रूषा).

७. –a) दे$_2$ °शैलाख्ये (→ °शैलाख्यं). –b) दे$_2$ स्थान (→ स्थानं). –c) दे$_1$ ब्रह्म (→ ब्रह्मन्); –d) दे$_2$ °योगिर् (→ °योगी).

८. –b) दे$_3$ सत्तमः (→ सत्तम). –c) दे$_3$ °मुखरी (→°मुखरीं).

माघमासे मघर्क्षेऽस्यां नद्यां स्नात्वा समाहितः ।
नित्यमष्टोत्तरशतं मुने कृत्वा प्रदक्षिणम् ॥ ९ ॥

श्रीकालहस्तिशैलेशं नमस्कृत्वा पुनः पुनः ।
सुशोभनं मठं कृत्वा दत्त्वा च शिवयोगिने ॥ १० ॥

माघमासे व्यतीपाते मघर्क्षे तु मुनीश्वर ।
श्रीकालहस्तिनाथाय तथैव शिवयोगिने ॥ ११ ॥

धनं धान्यं तिलं वस्त्रमपि दत्त्वा यथाबलम् ।
वत्सराणां त्रयं कृत्वा व्रतमेतत् स्वभार्यया ॥ १२ ॥

तदन्ते मघनक्षत्रे माघमासि मुनीश्वर ।
सुवर्णमुखरीस्नानं कृत्वा देवाय भक्तितः ॥ १३ ॥

दत्त्वा भूमिं तथा दीपं तथा धेनुं यथाबलम् ।
ब्राह्मणेभ्यश्च योगीमभ्यो मद्भक्तेभ्यो यथाबलम् ॥ १४ ॥

पूजां कृत्वा व्रतं ब्रह्मन् समाप्यैवं समाहितः ।
कालेन मरणं प्राप्तः पुनरिन्द्रोऽभवद् द्विज ॥ १५ ॥

स पुनः सर्वमैश्वर्यं भुक्त्वा सार्धं स्वभार्यया ।
श्रीकालहस्तिनाथस्य प्रसादेन पुनश्च सः ॥ १६ ॥

सुवर्णमुखरीतोये स्नानं कृत्वातिभक्तितः ।
पूजयामास देवेशं प्रसन्नं भक्तवत्सलम् ॥ १७ ॥

ततः पञ्चाक्षरं मन्त्रं प्रणवेन षडक्षरम् ।
साङ्गं प्रोवाच धर्मात्मा मन्नियोगाद् बृहस्पतिः ॥ १८ ॥

---

९. दे$_3$ cd - 10.-a Θ. –d) दे$_2$ प्रदक्षिण (→ प्रदक्षिणम्).

१२. –d) दे$_3$ व्रतमेत्सत भार्यया.

१३. –b) दे$_{2.3}$ माघमासे (→ माघमासि).

१४. –b) दे$_2$ यथात्वनं (→ यथाबलम्). –d) दे$_2$ यथाकलं (→ यथाबलम्).

१५. –a) दे2 पूजा (→पूजां); दे3 ब्र * न् (ब्रह्मन्).

१६. –a) दे$_3$ ऐश्वर्य (→ ऐश्वर्यं). –b) दे$_3$ सार्द्धे (→ सार्द्धं).

१८. –c) दे$_{2.3}$ सांग(→ साङ्गं); दे$_3$ प्रौवाच (→ प्रोवाच). –d) दे$_2$ * हस्पतिः (→ बृहस्पतिः).

ऋषिर्ब्रह्मास्य मन्त्रस्य प्रोक्तो वेदविदां वरैः ।
गायत्र्यं छन्द इत्युक्तं शिव एवास्य देवता ॥ १९ ॥

ओंकारं बीजमित्याहुराकाशः शक्तिरुच्यते ।
यकारादिक्रमाद् वर्णानङ्गुष्ठादिषु पञ्चसु ॥ २० ॥

तथा मूर्ध्नि ललाटे तु हृदि नाभौ पदद्वये ।
यकारादिक्रमाद् वर्णान् यादिषट्केण संयुतान् ॥ २१ ॥

हृदये विन्यसेन्मूर्ध्नि शिखायां कवचे तथा ।
नेत्रे चास्त्रे च विन्यस्य प्राणायामत्रयं कुरु ॥ २२ ॥

हविष्याशी जितक्रोधो वाग्यतो देवसंनिधौ ।
लक्षमेकं जपित्वैव मन्त्रमन्वहमादरात् ॥ २३ ॥

पुनः शुद्धेन मन्त्रेण वाञ्छितं साधयादरात् ।
अनेन सदृशो नास्ति नास्ति राजन् जगत्त्रये ॥ २४ ॥

यः प्रातरुत्थितो नित्यं जपेदष्टोन्तरं शतम् ।
तस्य सर्वाणि पापानि नश्यन्त्येव न संशयः ॥ २५ ॥

शिवेति वाचकं नित्यं चण्डालोऽपि वदेन्मुदा ।
सह तेन वदेद् वाचं सह तेन वसेत् सदा ॥ २६ ॥

यश्चतुर्वेदविद्विप्रः शिवशब्दविवर्जितः ।
तेन संभाषणं नित्यं न कुर्यान्मोहतोऽपि वा ॥ २७ ॥

---

१९. –b) दे$_2$ वैदविदां (→ वेदविदां). –c) दे$_3$ गायत्र (→ गायत्र्यं). –d) दे$_2$ एवास्मि, दे$_3$ एवास्मि, +देवास्मि (→ एवास्य).

२०. –b) दे$_{2.3}$ आकारः (दे$_3$°र) (→ आकाशः).

२१. –a) दे$_{2.3}$ च (→ तु). –c) दे$_{2.3}$ विन्यस्यानंतरं वर्णान्. –d) दे$_1$ जातिषट्केन (→ यादिषट्केण).

२२. –a) दे$_{2.3}$ च तथा (→ विन्यसेन्).

२४. –a) दे$_{2.3}$ सिद्धेन (→शुद्धेन). –c) दे$_1$ अनवाप्य मनेनास्मिन्.

२५. –a) दे$_{2.3}$ उत्थिता (→उत्थितो). –b) दे$_2$ शते (→शतम्).
–d) दे$_3$ नश्यंतेव (→नश्यन्त्येव).

२६. –b) दे$_2$ यदेन्, दे$_3$ वदन् (→वदेन्). –c) दे$_3$ * * द् (→वदेद्).

२७. –a) दे$_3$ यश्चवेतुर्वेदाविद्विप्रः.

नित्यमष्टसहस्रं यो जपेन्मन्त्रं समाहितः ।
ब्रह्महत्याकृतं पापं षण्मासात् तस्य शुध्यति ॥ २८ ॥

व्याधयश्च विनश्यन्ति मन्त्रस्यास्य जपेन तु ।
वश्याकर्षणविद्वेषस्तम्भनोच्चाटनादयः ॥ २९ ॥

मन्त्रेणानेन सिध्यन्ति देवराज महामते ।
अणिमादिमहासिद्धिर्मन्त्रेणानेन सिध्यति ॥ ३० ॥

बहुनोक्तेन किं राजन् मुक्तिः साक्षात् करे स्थिता।
तस्मादेनं महामन्त्रं साधयात्र महामते ॥ ३१ ॥

एवं पुरोहितेनोक्तो देवराजो मुनीश्वर ।
श्रीकालहस्तिशैलाख्ये जप्त्वा लक्षं समाहितः ॥ ३२ ॥

श्रीकालहस्तिशैलस्य प्रसादेन ममानघ ।
त्यक्त्वैश्वर्यं पुनर्ब्रह्मन् ब्रह्माणं समुपाविशत् ॥ ३३ ॥

ब्रह्मचर्यपरो दान्तः सत्यवादी मिताशनः ।
ततो ब्रह्माऽपि संतुष्टस्तस्मै तत्परमं वपुः ॥ ३४ ॥

दर्शयामास सर्वात्मा सर्ववस्त्ववभासकम् ।
सोऽपि तं प्रणिपत्येशं ब्रह्माणं मुनिपुंगव ॥ ३५ ॥

अवाप परमं भावं स्वकं कैवल्यसंज्ञितम् ।
पुनर्दृष्ट्वाऽस्य कैवल्यं मुनयः ससुरासुराः ॥ ३६ ॥

---

२८. –b) दे2 जपेमत्रं (→जपेन्मन्त्रं); दे1 समाहितं (→समाहितः).
–d) दे2.3 नश्यति (→शुध्यति).
२९. –b) दे3 जपेन्न (→जपेन).
३१. –c) दे2 एवं (→एनं).
३२. –b) दे1 मुनीश्वरः (→मुनीश्वर). –c) दे1 °शैलाख्यं (→°शैलाख्ये).
३४. –a) दे2 दातः (→दान्तः). –d) दे2.3 मत्परमं (→तत्परमं).
३५. –a) दे2 °न्यास (→°मास). –b) दे3 [भाव] भासकं (→भासकम्). –d) दे2 ब्रह्मण (→ब्रह्माणं).
३६. –a) दे3 भवं (→भावं). –b) दे2 °संतिकं, दे3 °संज्ञिकं (→°संज्ञितम्).
–d) दे3 (सु) ससुरा° (→ससुरा°).

बहवो मुक्तिसिद्ध्यर्थं प्राप्ताः स्थानमिदं मुने ।
केचिद् भोगेच्छया ब्रह्मन् केचिन्मद्भक्तिकाङ्क्षया ॥ ३७ ॥

सर्वे ते देशमाहात्म्यात् प्रसादादपि मे द्विज ।
अभवन्नाप्तकामाश्च पुण्यकर्मफलादपि ॥ ३८ ॥

य इमं देशमाश्रित्य सर्वैश्वर्यं न साधयेत् ।
तस्य ब्रह्मन् वृथा जन्म श्वकीटादेर्यथा जनिः ॥ ३९ ॥

य इमं देशमाश्रित्य न संसारं तरेत् क्षणात् ।
तस्य जन्म वृथा प्रोक्तं मुनिभिः सूक्ष्मदर्शिभिः ॥ ४० ॥

य इमं देशमुद्दिश्य न गच्छेत् प्रतिवत्सरम् ।
व्यर्थं तस्य भवेज्जन्म ब्रह्मन् वेदविदां वर ॥ ४१ ॥

अन्त्यजो वाऽधमो वाऽपि य इमं देशमाश्रितः ।
सफलं तस्य जन्मोक्तं धार्मिकैस्तत्त्वचिन्तकैः ॥ ४२ ॥

अहो मोहस्य माहात्म्यं विद्धि ब्रह्मविदां वर ।
इमं देशं विना लोको यदन्यत्र विचेष्टते ॥ ४३ ॥

इत्येवमुक्तं श्रुतिसारलभ्यं
विज्ञानमज्ञैरखिलैरलभ्यम् ।
मुक्तेरुपायं कृपया मयैत-
च्छ्रद्धाविहीनाय सदा न देयम् ॥ ४४ ॥

---

३७. –b) दे$_2$ प्राप्ता (→प्राप्ताः). –d) दे$_{2.3}$ केचित्व (दे$_3$° त्य) भयकांक्षया.

३८. –a) दे$_3$ सर्वेत्वेदेश मात्म्यात्. –c) दे$_2$ °नाम° (→°आप्त°).

३९. –c) दे$_{2.3}$ तस्य वृथा ब्रह्मन् जन्मश्वकीटादेर्यथा जनिः.

४०. –b) दे$_2$ नस्तसारं, दे$_3$ न संस्त्यत्यं (→न संसारं).

४१. –a) दे$_3$ परमं (→य इमं). –d) दे$_2$ ब्रह्मविदां (→वेदविदां).

४२. –c) दे$_1$ सकलं (→सफलं).

४३. –b) दे$_{2.3}$ ब्रह्मन् (→विद्धि).

४४. –a) दे$_2$ °लभ्य - (→°लभ्यं). –c) दे$_2$ त्वयैत-, दे$_3$ तयैन-(→मयैत-).

मत्पादभक्ताय महानुभाव,
त्वत्पादभक्ताय विलक्षणाय ।
सत्यादियुक्ताय च देयमेत-
च्छिष्याय संसारविमर्दनाय ॥ ४५ ॥
शरीरमर्थं च ददाति यः पुमान्
करोति वाचार्यसमीहितं सदा ।
तथाविधायामलबुद्धये मुने
प्रदेयमेतत् सुखदं विचक्षण ॥ ४६ ॥
पृष्टं त्वया यन्मुनिपुंगवेन
लिङ्गप्रकाशस्फुरितेन विप्र ।
उक्तं मया यत् तत् एव हेतो
वासिष्ठलिङ्गाख्यमिदं पुराणम् ॥ ४७ ॥
यः श्रद्धासहितमिदं पुराणरत्नं
भक्त्या पठति नरो महानुभावः ।
तद्वक्त्रे वसति सदा महेश्वरीयं
हृत्पद्मे परमशिवः प्रकाशते च ॥ ४८ ॥
यः श्रृणोति पुराणमिदं मुदा
भुक्तिमुक्तिकरं मुनिपुंगव ।
तस्य नश्यति पापमशेषतः
सत्यमेव हि मया परिभाषितम् ॥ ४९ ॥
सकलभुवनरक्षाकारणं यो महात्मा
प्रति दिनमथवार्थं वक्ति पुण्ये मुहूर्ते ।
सकलदुरितराशिध्वंसकः स्याद्धि लोके
पशुपतिरिव मर्त्यैः सर्वदा सर्वपूज्यः ॥ ५० ॥

---

४५. –c) दे2 °युक्ता * (→°युक्ताय).

४६. –b) दे2 चाचार्य (→वाचार्य). –d) दे3 विचक्षणा (→विचक्षण); दे2 प्रदेयमज्ञत् सुखदं विचक्षणां .

४७. –a) दे3 पृष्ठ (→पृष्टं). –b) दे3 °प्रकाशे-(→°प्रकाशस्-). –c) दे2 हेतो, (→हेतोर्); दे3 उक्तं मया यतन एव हेतौ.–d) दे2.3 °लैंगाख्य (→°लिङ्गाख्य).

४८. –a) दे3 °रत्न- (→°रत्नं). –d) दे2 हृदत्पये (→हृत्पद्मे).

४९. –a) दे2 य (→यः). –b) दे2 भक्ति ° (→भुक्ति°); दे3 °मुक्तिकं (→°मुक्तिकरं). –c) दे2 वस्यति (→नश्यति). –d) दे2.3 * (→हि).

५०. –a) दे3 °र * (→°रक्षा). –b) दे3 अर्थ (→अर्थं); दे2 महत्री, दे3 महूर्त्तां (→मुहूर्ते). –c) दे2.3 ध्वंसक (→ध्वंसकः).

इदं वासिष्ठलैङ्गाख्यं पुराणं पारमेश्वरम् ।
सर्वलोकोपकाराय वसिष्ठेनैव निर्मितम् ॥ ५१ ॥

अध्याया द्वादश श्लोकास्तथा चाष्टशतं ततः ।
अशीतिरधिकं सम्यज्ज्ञानमस्मिन् प्रतिष्ठितम् ॥ ५२ ॥

नमो रुद्राय सोमाय सदा सर्वस्य साक्षिणे ।
सर्वाय सर्वहीनाय संसारोत्तारहेतवे ॥ ५३ ॥

यस्याः पादाम्बुजद्वन्द्वस्मरणादेव केवलम् ।
विमुक्तिः सर्वजन्तूनां देव्यै तस्यै नमो नमः ॥ ५४ ॥

यत्प्रसादेन विज्ञानं यथावज्जायते नृणाम् ।
तं वन्दे षण्मुखं देवं ज्ञानशक्तिधरं परम् ॥ ५५ ॥

यस्य प्रसादलेशस्य लवलाभबलेन तु ।
सर्वसिद्धिरयत्नेन तं नमामि विनायकम् ॥ ५६ ॥

इत्युपपुराणे वासिष्ठलिङ्गे द्वादशोऽध्यायः ॥ १२ ॥

---

५१. –a) दे$_{1.2}$ वाशिष्ठ° (→वासिष्ठ°). –c) दे$_{2}$ सर्वलोके° (→सर्वलोको°).
–d) दे$_{1}$ वशिष्टेन विनिर्मितं.

५२. –b) दे$_{2.3}$ तथै (→तथा); दे$_{2}$ वाष्ट°(→चाष्ट°). –c) दे$_{1}$ आशीति°, दे$_{2.3}$ असीति° (→अशीति°). –d) दे$_{2.3}$ सम्यक् (→सम्यज्)

५३. –a) दे$_{2}$ सौमाय (→सोमाय).

५४. –b) दे$_{3}$ स्मरणेदेव (→स्मरणादेव).

५५. –c) दे$_{1}$ साक्षात् (→देवं).

५६. –b) दे$_{3}$ लवलेश लवेन तु. –c) दे$_{2}$ अयत्नेव (→अयत्नेन). –d) दे$_{2}$ * (→तं).

**पुष्पिका–** दे$_{1}$ इतिश्री वाशिष्टलिंग उपपुराणे द्वादशोध्यायः ॥ १२ ॥
दे$_{2.3}$ इति श्रीउपपुराणे वासिष्टलैंगे द्वादशोध्यायः ॥ १२ ॥
अध्यायसंख्यानन्तरमधिकम्–
दे$_{1}$ समाप्तः ॥ 0 ॥ पोथी लाला वजीरीमल्ल जीके वास्ते लीखी गई संवत् १८३४ मासे पौषशुक्ल षष्ठी रवीवारे लीखा नीहाल चंद कायस्थ नै ॥ श्री गंगा जी सहाय ॥ 0 ॥
दे$_{2}$ श्रीरस्तु इती श्री ॥ छ । छ । छ । छ छ ।
दे$_{3}$ संवत्सर ॥ १८८६ ॥

●

THE BOARD OF TRUSTEES
OF
THE ALL-INDIA KASHIRAJ TRUST

1. His Highness Maharaja Dr. Vibhuti Narain Singh, M.A., D.Litt. Fort, Ramnagar, Varanasi (*Chairman*).

*Trustee nominated by the Govt. of India :–*

2. Vacant.

*Trustees nominated by the Govt. of Uttar Pradesh :–*

3. Sri Krishna Chandra Pant, Ex. Minister, Govt. of India, 7, Tyagraj Marg, New Delhi.

4. Sri Lok Pati Tripathi, Ex. Minister, Govt. of Uttar Pradesh, Aurangabad, Varanasi.

*Trustees nominated by His Highness, the Maharaja of Banaras :–*

5. Dr. R. N. Dandekar, Bhandarkar Oriental Research Institute, Poona.

6. Pt. Shri Giridhari Lal Mehta, Chairman, Bellis India Ltd., Infar India Ltd., Trustee-Trust Estates of Baldeo Ram Mehta and Saligram Mehta; 4, Clive Row, Calcutta 7000001.

7. Padmabhushan Pt. Baladeva Upadhyaya, M.A. Sahityacharya, Vachaspati; Formerly Director, Sampurnanand Sanskrit University; Ravindrapuri, Varnasi.

Donation made to All-India Kashiraj Trust, Fort, Ramnagar, Varanasi, Will qualify for exemption under Sec. 80G of the Income Tax Act, 1961 in the hands of donors.

Statement of ownership and other particulars about

## पुराणम्–PURĀṆA

| | | |
|---|---|---|
| 1. | Place of Publication | ...Fort Ramnagar, Varanasi. |
| 2. | Periodicity of Publication | ...Half-yearly |
| 3. | Printer's Name | ...Vipul Shankar Pandya |
| | Nationality | ...Indian |
| | Address | ...Ratna Offsets Limited<br>B 21/42 A, Kamachha, Varanasi |
| 4. | Publisher's Name | ...Yogendra Narain Thakur<br>General Secretary, All-India<br>Kashiraj Trust |
| | Nationality | ...Indian |
| | Address | ...All-India Kashiraj Trust, Fort<br>Ramnagar, Varanasi. |
| 5. | Editor's Name | ...R.K. Sharma (New Delhi),<br>Dr. R.N.Dandekar (Pune)<br>V. Venkatachalam *(Chief Editor)* |
| | Nationality | ...Indian |
| 6. | Name of owner | ...All-India Kashiraj Trust, Fort<br>Ramnagar, Varanasi. |

I, Yogendra Narain Thakur, hereby declare that the particulars given above are true to the best of my knowledge.

**Yogendra Narain Thakur**
Publisher.

*Printed at the **RATNA OFFSETS LTD.,** B 21/42 A, Kamachha Varanasi-10. Phone-322820.*